# अनुक्रमः


| पाठः | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| | प्रार्थना | 1 |
| प्रथमः पाठः | पुरः पुरः प्रगच्छ रे | 2 |
| व्याकरणम्– | संस्कृत वर्णमाला [Sanskrit Alphabet] | 7 |
| द्वितीयः पाठः | मम प्रियः विद्यालयः | 11 |
| व्याकरणम्– | एतत्, तत् एवं किम् (सर्वनाम-शब्दानां प्रयोगः) [Use of Pronouns —This, That and What)] | 17 |
| तृतीयः पाठः | चत्वारि प्रियमित्राणि | 23 |
| व्याकरणम्– | अस्मद्– युष्मद्– सर्वनाम– रूपाणि [Forms of Pronouns— I, You] | 35 |
| चतुर्थः पाठः | मधुराः श्लोकाः | 38 |
| व्याकरणम्– | शब्दरूपाणि [Forms of Words—Nouns] | 45 |
| | कारकस्य परिचयः [Introduction to Cases] | 52 |
| पञ्चमः पाठः | जले अपि वसन्ति जीवाः | 54 |
| व्याकरणम्– | वचनम् [Numbers] | 59 |
| | धातुरूपाणि [Verb–Forms] | 63 |
| | पुल्लिङ्गम् [Masculine Gender] | 68 |
| षष्ठः पाठः | वीरबालिका गुञ्जनसक्सेना | 71 |
| व्याकरणम्– | लङ् लकारः (भूतकालः) [Past Tense] | 76 |
| | स्त्रीलिङ्गम् [Feminine Gender] | 80 |


Scanned by CamScanner

| | | |
|---|---|---|
| सप्तमः पाठः | प्रहेलिकाः | 82 |
| व्याकरणम्— | उपसर्गाः [Prefixes] | 87 |
| | अव्ययपदानि [Indeclinable Words] | 88 |
| अष्टमः पाठः | धन्या मातुः महिमा | 93 |
| व्याकरणम्— | शब्दरूपाणि [Forms of Words—Nouns] | 98 |
| नवमः पाठः | ''सिक्किम'' प्रदेशस्य सौन्दर्यम् | 103 |
| व्याकरणम्— | लृट्लकारः (भविष्यत् काल) [Future Tense] | 108 |
| | नपुंसकलिङ्गम् [Neuter Gender] | 111 |
| दशमः पाठः | योग्यः शिष्यः | 114 |
| व्याकरणम्— | उपपद-विभक्तिः | 120 |
| एकादशः पाठः | मधुराणि वचनानि | 122 |
| व्याकरणम्— | प्रत्ययः [Suffix] | 128 |
| | सङ्ख्याः [Numbers] | 129 |


Scanned by CamScanner

# प्रार्थना



स्वस्ति पन्थामनुचरेम
सूर्याचन्द्रमसाविव।
पुनर्ददताघ्नता
जानता सं गमेमहि।।



Scanned by CamScanner

# पुरः पुरः प्रगच्छ रे

प्रथमः पाठः



पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।
स्व-जन्म-भूमि रक्षणे
प्रयच्छ वीर! जीवनम्।।
शिरः कुरु समुन्नतम्
तवास्तु मा क्वचिद् भयम्।
पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।।
रणे धृतिः सुकौशलम्
प्रवर्धताम् मनोबलम्।
सुनिश्चितः जयस्तव
कुरु स्वधर्मपालनम्।।
पुरः पुरः प्रगच्छ रे
प्रगाय मातृवन्दनम्।।



Scanned by CamScanner

## शब्दार्थाः Word-Meaning

| | | |
|---|---|---|
| पुरः पुरः | आगे-आगे | ahead |
| प्रगच्छ | बढ़ते चलो | go |
| प्रगाय | गाओ | sing |
| मातृवन्दनम् | मातृवन्दना | motherland's prayer |
| स्व | अपनी | self |
| रक्षणे | रक्षा में | in defence |
| प्रयच्छ | दो | give |
| शिरः | सिर | head |
| समुन्नतम् | ऊँचा | high |
| तव | तुम्हारा | your |
| अस्तु | हो | be |
| क्वचिद् | कहीं | anywhere |
| रणे | युद्ध में | in war |
| धृतिः | धैर्य | patience |
| सुकौशलम् | अच्छा कौशल | good skill |
| प्रवर्धताम् | बढ़ाते रहो | increase |
| मनोवलम् | मनोबल | mental strength |
| जयः | विजय | win |
| कुरु | करो | do |
| स्वधर्मपालनम् | अपने धर्म का पालन | obey your duties |



Scanned by CamScanner

## अभ्यासः

1. **चित्रं दृष्ट्वा लिखन्तु 'आम्' अथवा 'न'–**



(i) किम् एते वीराः बालाः सन्ति? ------आम्------

(ii) किम् सर्वेषां हस्ते राष्ट्रध्वजः अस्ति? ------------------

(iii) किम् एते वीरबालाः अग्रे-अग्रे गच्छन्ति? ------------------

(iv) किम् अत्र पञ्च (5) बालाः सन्ति? ------------------

(v) किम् एते वीरबालाः प्रसन्नाः सन्ति? ------------------

(vi) किम् एतेषां दृष्टिः अग्रे अस्ति? ------------------

(vii) किम् एतेषां मनसि भयम् अस्ति? ------------------

2. **चित्रं दृष्ट्वा पाठात् उपयुक्तपदानि चित्वा वाक्यानि पूरयन्तु–**



पुरः पुरः ------------------------------ रे

प्रगाय ------------------------------।



स्व-जन्म-भूमि ------------------------------

प्रयच्छ वीर! ------------------------------।



Scanned by CamScanner



रणे ---------------------------------- सुकौशलम्

प्रवर्धताम् ----------------------------------।



---------------------------------- जयस्तव

कुरु ----------------------------------।

3. **उचितं शब्दार्थं चित्वा लिखन्तु–**

(i) पुरः पुरः --------------------------

(ii) प्रयच्छ --------------------------

(iii) जयः --------------------------

(iv) भूमिः --------------------------

(v) रणे --------------------------

| |
|---|
| विजयः |
| अग्रे-अग्रे |
| पृथ्वी |
| युद्धे |
| देहि |



Scanned by CamScanner

■ मूल्यात्मकः प्रश्नः

भवन्तः एतत् गीतम् अपठन्। एतत् गीतं देशभक्तिं प्रति प्रेरयति। 'भवन्तः स्वदेशाय किं किं कर्तुम् शक्नुवन्ति' इति वदन्तु लिखन्तु च–

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

■ गतिविधिः

अधः प्रदत्तस्थाने राष्ट्रध्वजं निर्माय उचितैः वर्णैः पूरयन्तु–



Scanned by CamScanner

# व्याकरणम्

## संस्कृत वर्णमाला
**[Sanskrit Alphabet]**

- संस्कृत–वर्णमाला
  - स्वराः (Vowels)
    - ह्रस्व–स्वराः (Short vowels)
    - दीर्घ–स्वराः (Long vowels)
  - व्यञ्जनानि (Consonants)

### ■ स्वराः

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ह्रस्व-स्वराः | – | अ | इ | उ | ऋ | लृ | | | |
| दीर्घ-स्वराः | – | आ | ई | ऊ | ॠ | ए | ऐ | ओ | औ |

### ■ व्यञ्जनानि

| | |
|---|---|
| क-वर्गः | क् ख् ग् घ् ङ् |
| च-वर्गः | च् छ् ज् झ् ञ् |
| ट-वर्गः | ट् ठ् ड् ढ् ण् |
| त-वर्गः | त् थ् द् ध् न् |
| प-वर्गः | प् फ् ब् भ् म् |
| अन्तःस्थाः | य् र् ल् व् |
| उष्माः | श् ष् स् ह् |

### ■ संयुक्त-व्यञ्जनानि

क्ष = क् + ष् + अ

त्र = त् + र् + अ

ज्ञ = ज् + ञ् + अ



Scanned by CamScanner

## ■ मात्रा-अवबोधनम्

| वर्णाः | मात्राः | वर्ण + मात्रा |
| --- | --- | --- |
| अ | — | क = क् + अ |
| आ | ा | का = क् + आ |
| इ | ि | कि = क् + इ |
| ई | ी | की = क् + ई |
| उ | ु | कु = क् + उ |
| ऊ | ू | कू = क् + ऊ |
| ऋ | ृ | कृ = क् + ऋ |
| ॠ | ॄ | कॄ = क् + ॠ |
| ए | े | के = क् + ए |
| ऐ | ै | कै = क् + ऐ |
| ओ | ो | को = क् + ओ |
| औ | ौ | कौ = क् + औ |
| अं | ं | कं = क् + अं |
| अः | ः | कः = क् + अः |

## अभ्यासः

1. वर्ण-विन्यासं कुर्वन्तु (Disjoin the letters)—

| | | | |
| --- | --- | --- | --- |
| रु = र् + उ | शी = श् + ई | चौ = च् + औ | छ = छ् + अ |
| रू = -------+-------- | षे = -------+-------- | तै = -------+-------- | मि = -------+-------- |
| धा = -------+-------- | पो = -------+-------- | ठः = -------+-------- | तृ = -------+-------- |
| टी = -------+-------- | ने = -------+-------- | डं = -------+-------- | वॄ = -------+-------- |
| ग = -------+-------- | चा = -------+-------- | ति = -------+-------- | मी = -------+-------- |
| वृ = -------+-------- | थे = -------+-------- | धो = -------+-------- | पौ = -------+-------- |



Scanned by CamScanner

2. **वर्ण-योजनं कुर्वन्तु (Join the letters)–**

| | | | |
|---|---|---|---|
| अ + त् + र् + अ | = | अत्र | (यहाँ, here) |
| क् + उ + त् + र् + अ | = | | (कहाँ, where) |
| त् + अ + त् + र् + अ | = | | (वहाँ, there) |
| स् + अ + द् + आ | = | | (हमेशा, always) |
| य् + अ + द् + आ | = | | (जब, when) |
| त् + अ + द् + आ | = | | (तब, then) |
| क् + अ + द् + आ | = | | (कब, when) |
| य् + अ + द् + इ | = | | (अगर, if) |

3. **उदाहरणानुसारं कुर्वन्तु–**

| | | | |
|---|---|---|---|
| अधुना | (अब, now) | = | अ + ध् + उ + न् + आ |
| अपि | (भी, also) | = | अ + प् + इ |
| अथवा | (या, or) | = | |
| अतः | (इसलिए, therefore) | = | |
| आम् | (हाँ, yes) | = | |
| उच्चैः | (ज़ोर से, loudly) | = | |
| शनैः | (धीरे, slowly) | = | |
| एव | (ही, only) | = | |
| एकदा | (एक बार, once) | = | |
| एवम् | (इस प्रकार, like this) | = | |
| च | (और, and) | = | |
| न | (नहीं, not) | = | |
| नीचैः | (नीचे, downward) | = | |
| पुनः | (फिर, again) | = | |
| परन्तु | (लेकिन, but) | = | |
| पुरा | (बहुत समय पहले, once upon a time) | = | |
| शीघ्रम् | (जल्दी, quickly) | = | |
| श्वः | (आने वाला कल, tomorrow) | = | |
| ह्यः | (बीता हुआ कल, yesterday) | = | |



Scanned by CamScanner

| | | | |
|---|---|---|---|
| बहिः | (बाहर, out) | = | ------------------------ |
| विना | (बिना, without) | = | ------------------------ |

4. **ध्यानेन पश्यन्तु (See carefully)–**

| | | | |
|---|---|---|---|
| द्य | = | द् + य् + अ | (यद्यपि = य् + अ + द् + य् + अ + प् + इ) |
| श्र | = | श् + र् + अ | (श्रवण = श् + र् + अ + व् + अ + ण् + अ) |
| ह्र | = | ह् + र् + अ | (ह्रस्व = ह् + र् + अ + स् + व् + अ) |
| हृ | = | ह् + ऋ | (हृदय = ह् + ऋ + द् + अ + य् + अ) |
| क्र | = | क् + र् + अ | (क्रम = क् + र् + अ + म् + अ) |
| कृ | = | क् + ऋ | (कृषि = क् + ऋ + ष् + इ) |
| वृ | = | व् + ऋ | (वृष्टि = व् + ऋ + ष् + ट् + इ) |
| कर्म | = | क् + अ + र् + म् + अ | |
| धर्म | = | ध् + अ + र् + म् + अ | |

5. **वर्णविन्यासं कुर्वन्तु–**

| | | |
|---|---|---|
| आम्रं (आम्रम्) | = | ------------------------ |
| राष्ट्रं (---------) | = | ------------------------ |
| भ्रमति | = | ------------------------ |
| हृष्टः | = | ------------------------ |
| हर्षः | = | ------------------------ |
| वृषभः | = | ------------------------ |
| इक्षु | = | ------------------------ |
| डमरूः | = | ------------------------ |
| छत्रम् | = | ------------------------ |

❊❊❊❊❊❊



Scanned by CamScanner

# मम प्रियः विद्यालयः

द्वितीयः पाठः

**एषः** विद्यालयः अस्ति।

एषः **मम** विद्यालयः अस्ति।

मम विद्यालयः सुन्दरः अस्ति।

मम विद्यालयः **विशालः** अपि अस्ति।

अहं **प्रतिदिनं** विद्यालयं **गच्छामि**।

अहं विद्यालये प्रतिदिनं पाठं **पठामि**।

अहं विद्यालये प्रतिदिनं **लेखम्** अपि लिखामि।

विद्यालये मम **अनेकानि** मित्राणि सन्ति।






Scanned by CamScanner

अहं **मित्रैः सह क्रीडामि।**

**अस्माकं** विद्यालये अनेकानि **चित्राणि** सन्ति।

चित्राणि सुन्दराणि सन्ति।

**वयं मिलित्वा** सुन्दराणि चित्राणि **पश्यामः।**

वयं मिलित्वा **गीतानि** अपि **गायामः।**

वयं मिलित्वा **क्रीडाङ्गणे** क्रीडामः धावामः च।

अस्माकम् अध्यापकाः अध्यापिकाः च **स्नेहेन पाठयन्ति।**

वयम् अपि स्नेहेन पठामः अध्यापकानाम् **च** सम्मानं कुर्मः।

**यदा अवकाशः** भवति वयं मिलित्वा **एव** गृहम् **आगच्छामः।**

वयं मिलित्वा एव गृहकार्यं **कुर्मः** क्रीडामः च।



## शब्दार्थाः : Word-Meaning

| | | |
|---|---|---|
| **एषः** | यह | this |
| **मम** | मेरा | my |
| **विशालः** | बड़ा | big |
| **प्रतिदिनं** | रोज़ | daily |
| **गच्छामि** | (मैं) जाता हूँ/जाती हूँ | (I) go |
| **पठामि** | (मैं) पढ़ता हूँ/पढ़ती हूँ | (I) read |
| **लेखम्** | लेख (को) | writing |
| **अनेकानि** | बहुत से | many |
| **मित्रैः सह** | मित्रों के साथ | with friends |



Scanned by CamScanner

| | | |
|---|---|---|
| क्रीडामि | (मैं) खेलता हूँ/खेलती हूँ | (I) play |
| अस्माकं | हमारे | our |
| चित्राणि | चित्र | pictures |
| वयं | हम | we |
| मिलित्वा | मिलकर | together |
| पश्यामः | (हम) देखते हैं | (we) see |
| गीतानि | गीत | songs |
| गायामः | (हम) गाते हैं | (we) sing |
| क्रीडाङ्गणे | खेल के मैदान में | in playground |
| स्नेहेन | प्यार से | with love |
| पाठयन्ति | पढ़ाते हैं/पढ़ाती हैं | teach |
| यदा | जब | when |
| अवकाशः | छुट्टी | holiday/break |
| एव | ही | only |
| आगच्छामः | (हम) आते हैं | (we) come |
| कुर्मः | (हम) करते हैं | (we) do |



Scanned by CamScanner

## अभ्यासः

**1. पाठं पठित्वा लिखन्तु 'आम्' अथवा 'न'–**

(i) किं मम विद्यालयः सुन्दरः अस्ति? ------आम्------
(ii) किं मम विद्यालयः विशालः अपि अस्ति? ----------------
(iii) किम् अहं प्रतिदिनं विद्यालयं गच्छामि? ----------------
(iv) किम् अहं गीतं लिखामि? ----------------
(v) किम् अहं मित्रैः सह क्रीडामि? ----------------
(vi) किम् अस्माकम् अध्यापकाः स्नेहेन पाठयन्ति? ----------------

**2. मञ्जूषायां प्रदत्त-पदैः रिक्तस्थानानि पूरयन्तु–**

| गीतानि | विद्यालयं | पाठं | चित्राणि | लेखम् |
| --- | --- | --- | --- | --- |

(i) अहं प्रतिदिनं ---------------- गच्छामि।
(ii) विद्यालये प्रतिदिनं ---------------- पठामि।
(iii) प्रतिदिनं ---------------- अपि लिखामि।
(iv) वयं मिलित्वा ---------------- गायामः।
(v) वयं सुन्दराणि ---------------- पश्यामः।

**3. उचितं पर्याय-पदं चित्वा लिखन्तु–**

| नित्यं | पाठशाला | आदरः | शोभनः | क्रीडाक्षेत्रे |
| --- | --- | --- | --- | --- |

(i) विद्यालयः ----------------
(ii) सुन्दरः ----------------
(iii) प्रतिदिनं ----------------
(iv) क्रीडाङ्गणे ----------------
(v) सम्मानं ----------------

**4. पाठं पठित्वा एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) एषः कः अस्ति? ----------------
(ii) विद्यालये कानि सुन्दराणि सन्ति? ----------------
(iii) विद्यालये अहं कैः सह क्रीडामि? ----------------
(iv) वयं कुत्र क्रीडामः धावामः च? ----------------
(v) वयं केषां सम्मानं कुर्मः? ----------------



Scanned by CamScanner

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) कः विशालः अस्ति?

..............................................................................................................

(ii) विद्यालये अनेकानि कानि सन्ति?

..............................................................................................................

(iii) के स्नेहेन पाठयन्ति?

..............................................................................................................

(iv) कस्य अनेकानि मित्राणि सन्ति?

..............................................................................................................

(v) वयं मिलित्वा किं कुर्मः ?

..............................................................................................................

6. **मञ्जूषातः उचितं वाक्यं चित्वा चित्राणां समक्षं लिखन्तु–**



..............................



..............................



..............................



..............................

| मञ्जूषा | बालः लिखति। बालः नमति। बालः पठति। बालः चलति। |
|---|---|



Scanned by CamScanner

■ **मूल्यात्मकः प्रश्नः**

भवन्तः अपठन् यत् छात्राः प्रतिदिनं विद्यालयं गच्छन्ति। ते अध्यापकानां सम्मानं कुर्वन्ति। ते गृहकार्यम् अपि मिलित्वा कुर्वन्ति। अधुना स्वविषये विचारयन्तु–

भवान्/भवती विद्यालये किं किं करोति?

■ **गतिविधिः**

भवान्/भवती प्रतिदिनं विद्यालये अनेकानि वस्तूनि पश्यति। यथा– पुस्तकानि, श्यामपट्टम्, सङ्गणकम्, आसन्दिकाम्, श्वेतवर्तिकाम्, पादकन्दुकम् आदिवस्तूनि। कयोः अपि द्वयोः चित्रं निर्माय तयोः नामनी लिखन्तु–

## व्याकरणम्

### एतत्, तत् एवं किम् (सर्वनाम-शब्दानां प्रयोगः)
**[Use of Pronouns —This, That and What]**

<u>एषः</u> <u>कः</u> अस्ति?

<u>एषः</u> मम विद्यालयः अस्ति।

<u>एतस्य</u> भवनं सुन्दरम् अस्ति।

<u>तौ</u> छात्रौ विद्यालयं गच्छतः।

<u>तत्</u> भवनम् अतीव विशालम् अस्ति।

<u>के</u> द्वारे तिष्ठन्ति?

<u>एते</u> छात्राः द्वारे तिष्ठन्ति?

<u>ते</u> सर्वे कक्षासु गच्छन्ति।




- उपरिलिखितेषु वाक्येषु रेखाङ्कितानि ''कः, एषः, एतस्य, तौ, तत्'' इति पदानि सर्वनामपदानि सन्ति।
- अत्र 'एषः', 'एतस्य', 'एते' इति पदानि 'एतत्' (यह, This) शब्दस्य रूपाणि सन्ति।
- 'तौ', 'तत्', 'ते' इति पदानि 'तत्' (वह, That) शब्दस्य रूपाणि सन्ति।
- 'कः' इति पदम् 'किम्' (क्या, What) शब्दस्य रूपम् अस्ति। 'किम्' पदस्य प्रयोगः प्रश्ननिर्माणाय अपि भवति।
- 'एतत्', 'तत्' एवं 'किम्' शब्दानाम् रूपाणि त्रिषु लिङ्गेषु भवन्ति।



Scanned by CamScanner

■ अधुना एतेषां सर्वनामपदानां विभिन्नलिङ्गेषु लिखितानि रूपाणि पश्यन्तु–

### एतत् (पुल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

### एतत् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

### एतत् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |



Scanned by CamScanner

## तत् (पुल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## तत् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

## तत् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |



Scanned by CamScanner

## किम् (पुल्लिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## किम् (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

## किम् (नपुंसकलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |



Scanned by CamScanner

■ 'किम्' सर्वनाम-पदस्य प्रयोगः प्रश्ननिर्माणार्थम् भवति। अन्यानि प्रश्नवाचकानि अव्ययपदानि अपि सन्ति येषां प्रयोगः प्रश्ननिर्माणार्थं भवति।

| | | | |
|---|---|---|---|
| कदा | – | कब | (When) |
| कुत्र | – | कहाँ | (Where) |
| कथम् | – | कैसे/किस प्रकार | (How) |
| किमर्थम् | – | किसलिए | (Why) |
| कुतः | – | कहाँ से | (From where) |
| कति | – | कितने | (How many) |

## अभ्यासः

1. **ध्यानेन पश्यन्तु पठन्तु अवगच्छन्तु लिखन्तु च (See, read, understand and write carefully)–**

| एकवचनम् (Singular) | | द्विवचनम् (Dual) | | बहुवचनम् (Plural) | |
|---|---|---|---|---|---|
| सः (पु०) (वह, He) | ------- सः-------- | तौ | ------------- | ते | ------------- |
| सा (स्त्री०) (वह, She) | ------------------ | ते | ------------- | ताः | ------------- |
| कः (पु०) (कौन, Who) | ------------------ | कौ | ------------- | के | ------------- |
| का (स्त्री०) (कौन, Who) | ------------------ | के | ------------- | काः | ------------- |
| एषः (पु०) (यह, This) | ------------------ | एतौ | ------------- | एते | ------------- |
| एषा (स्त्री०) (यह, This) | ------------------ | एते | ------------- | एताः | ------------- |



Scanned by CamScanner

2. उचित-सर्वनामपदैः रिक्तस्थानानि पूरयन्तु (**Fill in the blanks using appropriate pronouns**)-

| | | | | | | |
|---|---|---|---|---|---|---|
| पुल्लिङ्गे | एषः | बालकः | एतौ | बालकौ | एते | बालकाः |
| | एषः | कः | एतौ | ------------- | एते | ------------ |
| स्त्रीलिङ्गे | एषा | बालिका | एते | बालिके | एताः | बालिकाः |
| | एषा | का | एते | ------------- | एताः | ------------ |
| नपुंसकलिङ्गे | एतत् | पुस्तकम् | एते | पुस्तके | एतानि | पुस्तकानि |
| | एतत् | किम् | एते | ------------- | एतानि | ------------ |
| पुल्लिङ्गे | सः | छात्रः | ------------ | छात्रौ | ------------ | छात्राः |
| स्त्रीलिङ्गे | सा | छात्रा | ------------ | छात्रे | ------------ | छात्राः |
| नपुंसकलिङ्गे | तत् | फलम् | ------------ | फले | ------------ | फलानि |

❊❊❊❊❊❊



Scanned by CamScanner

# चत्वारि प्रियमित्राणि

तृतीयः पाठः



एष : कच्छपः।



एषः काकः।



एषः मूषकः।



एषः हरिणः।

**एतानि चत्वारि** मित्राणि **सन्ति**। एतानि **प्रियमित्राणि** सन्ति।

एतानि प्रियमित्राणि एकस्मिन् **वने** मिलित्वा **वसन्ति**।





Scanned by CamScanner



**एकदा** हरिणः दूरम् गच्छति। सायङ्कालः भवति परन्तु **सः** न **आगच्छति**। मूषकः काकः कच्छपः च प्रतीक्षां **कुर्वन्ति**। ते परस्परं **वार्तालापं** कुर्वन्ति।




सूर्यास्तः भवति परन्तु हरिणः न आगच्छति।






Scanned by CamScanner







काकः हरिणम् पश्यति। सः तस्य **समीपं** गच्छति। सः हरिणं **पृच्छति**-









Scanned by CamScanner

काकः आगच्छति। कच्छपः मूषकः च तं पृच्छतः—















Scanned by CamScanner













मूषकः जालं कृन्तति। हरिणः **मुक्तः** भवति। **सर्वे प्रसन्नाः भूत्वा गच्छन्ति।**



Scanned by CamScanner



सर्वे पुनः प्रसन्नाः भूत्वा मिलित्वा च **सुखेन** वसन्ति।



Scanned by CamScanner

## शब्दार्थाः Word-Meaning

| | | |
|---|---|---|
| कच्छपः | कछुआ | tortoise/turtle |
| काकः | कौआ | crow |
| हरिणः | हिरण | deer |
| मूषकः | चूहा | mouse |
| एतानि | ये | these |
| चत्वारि | चार | four |
| सन्ति | हैं | are |
| प्रियमित्राणि | अच्छे प्यारे दोस्त | best friends |
| वने | जंगल में | in forest |
| वसन्ति | (वे) रहते हैं | (they) live |
| एकदा | एक बार | once |
| सः | वह | he |
| आगच्छति | (वह) आता है | (he) comes |
| कुर्वन्ति | (वे) करते हैं | (they) do |
| ते | वे | they |
| वार्तालापं | बातचीत | conversation |
| कुत्र | कहाँ | where |
| न | नहीं | don't/no |
| जानामि | (मैं) जानता हूँ | (I) know |
| अधुना | अब | now |
| आगच्छत् | (वह) आया | (he) came |
| संकटे | मुसीबत में | in trouble |
| पश्यामि | (मैं) देखता हूँ | (I) see |
| त्वम् | तुम | you |



Scanned by CamScanner

| | | |
|---|---|---|
| असि | (तुम) हो | (you) are |
| त्राहि | बचाओ, रक्षा करो | protect |
| माम् | मुझे | me |
| समीपं | पास | near |
| पृच्छति | (वह) पूछता है | (he) asks |
| कथम् | कैसे | how |
| अभवत् | हुआ | happened |
| व्याधः | शिकारी | hunter |
| अबद्धत् | बाँध लिया | trapped |
| सहायतार्थम् | मदद के लिए | for help |
| शीघ्रम् | जल्दी | quickly |
| स्वजालेन | अपने जाल से | with his net |
| भविष्यति | होगा | will be |
| चिन्तां | फ़िक्र | worry |
| मा | मत | don't |
| कर्तिष्यामि | (मैं) काट दूंगा | (I) will cut |
| त्वाम् | तुम्हें | you |
| स्वपृष्ठे | अपनी पीठ पर | on my back |
| नेष्यामि | (मैं) ले जाऊँगा | (I) will take |
| मुक्तः | स्वतन्त्र | free |
| सर्वे | सब | all |
| प्रसन्नाः | प्रसन्न, खुश | happy |
| भूत्वा | होकर | on being |
| गच्छन्ति | (वे) जाते हैं | (they) go |
| पुनः | फिर | again |
| सुखेन | सुख से | happily |



Scanned by CamScanner

## अभ्यासः

**1. एतानि कथनानि शुद्धानि अशुद्धानि वा वदन्तु लिखन्तु च–**

| कथनानि | उत्तराणि |
|---|---|
| (i) चत्वारि प्रियमित्राणि वने वसन्ति। | शुद्धम् |
| (ii) एकदा हरिणः दूरं गच्छति। | ------------------ |
| (iii) व्याधः कच्छपं जालेन अबद्धत्। | ------------------ |
| (iv) मूषकः जालं कृन्तति। | ------------------ |
| (v) कच्छपः अत्र-तत्र पश्यति। | ------------------ |
| (vi) सर्वे प्रसन्नाः भूत्वा सुखेन वसन्ति। | ------------------ |

**2. मञ्जूषायां प्रदत्त-पदैः रिक्तस्थानानि पूरयन्तु–**

(i) चत्वारि मित्राणि मिलित्वा -------------- वसन्ति।

(ii) हरिणः ----------------- गच्छति।

(iii) ते परस्परं -------------- कुर्वन्ति।

(iv) ----------------- हरिणम् पश्यति।

(v) ----------------- मुक्तः अभवत्।

| मञ्जूषा |
|---|
| काकः |
| वार्तालापं |
| वने |
| हरिणः |
| दूरम् |

**3. उचितं विपरीतं पदं चित्वा लिखन्तु–**

(i) दूरम् ----------------------------

(ii) सायङ्कालः ----------------------------

(iii) प्रसन्नाः ----------------------------

(iv) सुखेन ----------------------------

(v) मुक्तः ----------------------------

| मञ्जूषा |
|---|
| खिन्नाः |
| दुःखेन |
| प्रातःकालः |
| बद्धः |
| समीपम् |



Scanned by CamScanner

4. **एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**



(i) कः दूरं गच्छति? (हरिणः, काकः)

------------------------------------

(ii) हरिणम् कः अबद्धत्? (कृषकः, व्याधः)

------------------------------------

(iii) संकटे कः आसीत्? (काकः, हरिणः)

------------------------------------

(iv) जालम् कः अकृन्तत्? (मूषकः, कच्छपः)

------------------------------------

(v) के प्रसन्नाः अभवन्? (चत्वारि मित्राणि, सर्वे जनाः)

------------------------------------

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) चत्वारि मित्राणि कुत्र वसन्ति स्म?

--------------------------------------------------------------------------------

(ii) के प्रतीक्षां कुर्वन्ति?

--------------------------------------------------------------------------------

(iii) व्याधः हरिणम् केन अबद्धत्?

--------------------------------------------------------------------------------

(iv) मूषकं हरिणस्य समीपे कः अनयत्?

--------------------------------------------------------------------------------

(v) कः कथयति– 'त्राहि माम्, त्राहि माम्'?

--------------------------------------------------------------------------------

6. **एतानि वाक्यानि कथाक्रमानुसारं योजयित्वा पठन्तु लिखन्तु च–**



(i) काकः मूषकम् हरिणस्य समीपम् अनयत्।

(ii) एकदा एकः व्याधः हरिणम् जालेन अबद्धत्।

(iii) हरिणस्य मित्राणि तस्य प्रतीक्षाम् अकुर्वन्।

(iv) हरिणः मुक्तः अभवत्।

(v) मूषकः जालम् अकृन्तत्।



Scanned by CamScanner

(i) ----------------------------------------

(ii) ----------------------------------------

(iii) ----------------------------------------

(iv) ----------------------------------------

(v) ----------------------------------------

**7. उचितपदैः वाक्यानि रचयन्तु–**

| | | |
|---|---|---|
| एषः | मूषकः | धावति |
| सः | हरिणः | गच्छति |
| अत्र | अत्र | खादति |
| तत्र | कच्छपः | उत्पतति |
| व्याधः | काकः | आगच्छति |

यथा:– (i) व्याधः अत्र आगच्छति।

(ii) ----------------------------------------

(iii) ----------------------------------------

(iv) ----------------------------------------

(v) ----------------------------------------

## ■ मूल्यात्मकः प्रश्नः

**भवान्/भवती पाठे चतुर्णाम् मित्राणाम् विषये अपठत्। भवताम् कति मित्राणि सन्ति? भवान्/भवती मित्रैः सह कीदृशं व्यवहारं करोति? केषाञ्चित् त्रयाणां कार्याणाम् उल्लेखं करोतु।**



Scanned by CamScanner

## ■ गतिविधिः

1. अधोलिखित-तालिकायाम् पशु-पक्षिणाम् नामानि उदाहरणानुसारं चिह्नीकुरुत–

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| | वा | पः | न | वा | | स | र्पः | ग | जः |
| | (सिं | हः) | रः | न | | क | च्छ | पः | |
| | ग | टः | क | रः | | | | यः | |
| | | | | | ह | पः | | धे | मू |
| सा | र | च | ता | | रि | कः | | ष | रः |
| | रि | ट | लः | | णः | न | कः | र | शु |
| | ष | का | कः | | | | | ब | कः |
| | कु | प | | शु | अ | जा | प | | |
| कु | क्कु | टः | | क | श्वः | श | | धे | कः |
| षः | रः | क | | शृ | गा | लः | हः | नुः | वः |
| | | | | | | | | | |

2. उपरिलिखित–तालिकायां चिह्नीकृतानि पशु-पक्षिणाम् नामानि अधः लिखन्तु–

------सिंहः------    --------------------    --------------------    --------------------

--------------------    --------------------    --------------------    --------------------

--------------------    --------------------    --------------------    --------------------

--------------------    --------------------    --------------------    --------------------



Scanned by CamScanner

# व्याकरणम्

## अस्मद्-युष्मद्-सर्वनाम-रूपाणि
**[Forms of Pronouns—I, You]**



सुधा — अहं सुधा अस्मि। त्वं कः असि?

दिवाकरः — अहं दिवाकरः अस्मि। त्वं किं करोषि?

सुधा — अहं पठामि। त्वं किं करोषि?

दिवाकरः — अहम् अपि पठामि। त्वं कुत्र पठसि?

सुधा — अहं डी.ए.वी. विद्यालये पठामि। त्वं कुत्र पठसि?

दिवाकरः — अहम् अपि डी.ए.वी. विद्यालये पठामि। अहं तत्र संस्कृतं पठामि। किं त्वम् अपि संस्कृतं पठसि?

सुधा — आम्, अहम् अपि संस्कृतं पठामि। आवाम् उभौ संस्कृतं पठावः। किं त्वं सायङ्काले खेलसि?

दिवाकरः — आम्! अहं सायङ्काले क्रीडामि। मम मित्राणि अपि खेलन्ति।

सुधा — मम मित्राणि अपि खेलन्ति।

दिवाकरः — वयं सर्वे क्रीडामः।

अस्मिन् संवादे 'अहं' 'वयम्' इति पदद्वयम् 'अस्मद्' सर्वनामशब्दस्य द्वे रूपे स्तः। एवमेव 'त्वं' पदं 'युष्मद्' सर्वनामशब्दस्य रूपम् अस्ति। अधुना वयं एतयोः रूपाणि पठिष्यामः।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् | आवाम् | अस्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम | आवयोः | अस्माकम् |
| सप्तमी | मयि | आवयोः | अस्मासु |



Scanned by CamScanner

एवमेव 'युष्मद्' सर्वनामशब्दस्य रूपाणि अपि भवन्ति–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् | युवाम् | युष्मान् |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव | युवयोः | युष्माकम् |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## अभ्यासः

**1. मञ्जूषायाः उचितपदानि गृहीत्वा अधोलिखितं वार्तालापं पूरयत–**



छात्राः – नमो नमः महोदय!

आचार्यः – भो छात्राः। आगच्छत -------------------- स्वागतम् अस्ति।

छात्राः – धन्यवादाः।

आचार्यः – विवेक! -------------------- किं पठसि?

विवेकः – महोदय! -------------------- संस्कृतं पठामि।

आचार्यः – किं -------------------- समीपे पुस्तकम् अस्ति?

विवेकः – आम् -------------------- समीपे संस्कृतस्य पुस्तकम् अस्ति।

आचार्यः – अस्तु!अद्य -------------------- किम् पठिष्यथ?

छात्राः – महोदय!-------------------- व्याकरणम् उपदिशतु (पाठयतु) भवान्।

**मञ्जूषा**

त्वम्
मम
अस्मान्
युष्माकम्
यूयम्
अहम्
तव



Scanned by CamScanner

2. **अधोलिखितेषु वाक्येषु स्थूलपदानि बहुवचने परिवर्तयन्तु–**

**अहम्** षष्ठी-कक्षायाः **छात्रा अस्मि**। **त्वम्** कस्याः कक्षायाः छात्रा **असि**? **अहम्** मित्रैः सह विद्यालयं **गच्छामि**। **त्वम्** केन सह विद्यालयं **गच्छसि**? तत्र नरेशः महोदयः **माम्** संस्कृतम् पाठयति। **त्वाम्** संस्कृतम् कः पाठयति? **मम** मित्राणि **मह्यम्** भोजनं यच्छन्ति। किम् **तव** मित्राणि **तुभ्यम्** भोजनं यच्छन्ति? **मम** अध्यापकाः अध्यापिकाः च **मयि** विश्वसन्ति। किम् **तव** अध्यापकाः अध्यापिकाः च **त्वयि** विश्वसन्ति?

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

❊❊❊❊❊❊



Scanned by CamScanner

# मधुराः श्लोकाः

चतुर्थः पाठः



1. सत्यं **वदन्ति मधुरं** च **सदा** वदन्ति,
**ये** अप्रियं **किमपि** नासत्यं वदन्ति।
ते **सज्जनाः सहृदयाः** च **परोपकारिणः**,
श्रेष्ठाः जनाः **परहिताय** सुखम् **त्यजन्ति**।।

**अन्वयः** ये सदा सत्यं वदन्ति मधुरं च वदन्ति, किमपि अप्रियं असत्यं (च) न वदन्ति । ते सज्जनाः सहृदयाः परोपकारिणः च (भवन्ति)। श्रेष्ठाः जनाः परहिताय सुखम् त्यजन्ति।

**भावार्थः** ये जनाः सदा सत्यं मधुरं च वदन्ति, कदापि किमपि अप्रियम् असत्यं च न वदन्ति। ते जनाः सज्जनाः भवन्ति। ते सरलहृदयाः परोपकारिणः च भवन्ति। सदा अन्येषाम् जनानां परोपकाराय जीवन्ति। श्रेष्ठाः जनाः, उत्तमाः जनाः अन्येषां सुखाय स्वसुखं त्यजन्ति। परहिताय निजं सुखम् त्यजन्ति।



2. **उद्यमेन** हि **सिध्यन्ति** कार्याणि न **मनोरथैः**।
नहि सुप्तस्य सिंहस्य **प्रविशन्ति** मुखे **मृगाः**।।

**अन्वयः** कार्याणि उद्यमेन हि सिध्यन्ति मनोरथैः न। सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति।



**भावार्थः** सर्वाणि कार्याणि परिश्रमेण एव सफलानि भवन्ति। केवलम् इच्छया न। भोजनाय पशून् प्राप्तुं सिंहः अपि प्रयासं करोति। सुप्तस्य सिंहस्य मुखे पशवः स्वयमेव प्रवेशं न कुर्वन्ति।



Scanned by CamScanner

3. **अयं निजः परो** वेति **गणना लघुचेतसाम्।**
**उदारचरितानां** तु **वसुधैव कुटुम्बकम्।।**



**अन्वयः** अयं निजः परः वा इति गणना लघुचेतसाम् भवति। उदारचरितानां तु वसुधा एव कुटुम्बकम् (भवति)।

**भावार्थः** अयं जनः मदीयः अस्ति अथवा परकीयः अस्ति। ये जनाः एवं चिन्तयन्ति तेषां हृदयं लघु भवति। येषां हृदयं विशालं भवति तेभ्यः सम्पूर्णा पृथिवी परिवारः इव भवति।

4. **प्रियवाक्यप्रदानेन** सर्वे **तुष्यन्ति जन्तवः।**
तस्मात् तदेव **वक्तव्यं,** वचने **का** दरिद्रता।।



**अन्वयः** सर्वे जन्तवः प्रियवाक्य-प्रदानेन तुष्यन्ति। तस्मात् तत् एव वक्तव्यम्। वचने का दरिद्रता।

**भावार्थः** यदि वयं सर्वैः सह मधुरं वदिष्यामः तदा सर्वे जनाः प्रसन्नाःभविष्यन्ति। अतः मधुरं भाषणम् एव कर्तव्यम्। मधुरभाषणे सङ्कोचः न करणीयः।

5. **चन्दनं शीतलं लोके** चन्दनात् अपि **चन्द्रमाः।**
चन्द्रचन्दनयोः **मध्ये** शीतला **साधुसङ्गतिः।।**

**अन्वयः** लोके चन्दनं शीतलं चन्दनात् अपि चन्द्रमाः।
चन्द्रचन्दनयोः मध्ये साधुसङ्गतिः शीतला।



**भावार्थः** संसारे चन्दनं शीतलं भवति। चन्द्रः चन्दनात् अपि अधिकः शीतलः भवति। चन्द्रस्य चन्दनस्य च मध्ये सज्जनानां मित्रता अधिका शीतला भवति। अर्थात् सज्जनानां मित्रता चन्द्रात् चन्दनात् च अधिका शीतला भवति। अतः सज्जनैः सह मित्रता करणीया।



Scanned by CamScanner

ध्यातव्यम्–

श्लोकेषु कानिचित् सन्धियुक्त-पदानि प्रयुक्तानि सन्ति। छात्रेभ्यः सरलतया अर्थबोधनाय तेषां सन्धि-विच्छेदः अधः प्रदत्तः।

सन्धि-विच्छेदः

वसुधैव = वसुधा + एव

परोवेति = परः + वा + इति

तदेव = तत् + एव

नासत्यम् = न + असत्यम्

## शब्दार्थाः : Word-Meaning

| | | |
|---|---|---|
| वदन्ति | (वे) बोलते हैं | (they) speak |
| मधुरं | मीठा | sweet |
| सदा | हमेशा | always |
| ये | जो (सब) | who all |
| किमपि | कुछ भी | any thing |
| सज्जनाः | अच्छे लोग | good people |
| सहृदयाः | अच्छे मन वाले | noble hearted |
| परोपकारिणः | दूसरों का भला करने वाले | who do good to others |
| परहिताय | दूसरों के भले के लिए | for good of others |
| त्यजन्ति | (वे) छोड़ देते हैं | (they) sacrifice |
| उद्यमेन | प्रयास (कोशिश) से | with effort |
| सिध्यन्ति | सफल होते हैं | get success |
| मनोरथैः | इच्छा से | with desires |
| प्रविशन्ति | प्रवेश करते हैं | enter |



Scanned by CamScanner

| | | |
|---|---|---|
| मृगाः | हिरण/पशु | deer/animals |
| अयं | यह | this |
| निजः | अपना | of self |
| परः (परो) | पराया | of others |
| गणना | गिनती | counting (consideration) |
| लघुचेतसाम् | छोटे दिलवालों की | of low hearted |
| उदारचरितानां | बड़े दिलवालों की | of large hearted |
| वसुधा | पृथ्वी | earth |
| कुटुम्बकम् | परिवार | family |
| प्रियवाक्यप्रदानेन | मीठे वाक्य बोलने से | by speaking sweet sentences or speaking sweetly |
| तुष्यन्ति | प्रसन्न होते हैं | are pleased |
| जन्तवः | पशु | animals |
| वक्तव्यं | बोलना चाहिए | should speak |
| का | क्या | what |
| चन्दनं | चन्दन की लकड़ी | sandal wood |
| शीतलं | ठंडा | cool |
| लोके | संसार में | in the world |
| चन्द्रमाः | चाँद | the moon |
| मध्ये | बीच में | in between |
| साधुसङ्गतिः | अच्छे लोगों की मित्रता | friendship of noble people |



Scanned by CamScanner

## अभ्यासः

1. पाठं पठित्वा लिखन्तु 'आम्' अथवा 'न'-

(i) सदा मधुरं ववतव्यम्। ---------आम्---------

(ii) सदा परिश्रमः करणीयः। --------------------

(iii) परोपकारः न करणीयः। --------------------

(iv) सम्पूर्णा पृथिवी एव परिवारः। --------------------

(v) जनाः प्रियवाक्येन प्रसन्नाः भवन्ति। --------------------

(vi) सज्जनैः सह मित्रता न करणीया। --------------------

2. मञ्जूषायां प्रदत्त-पदैः रिक्तस्थानानि पूरयन्तु-

| |
|---|
| प्रसन्नाः |
| शीतला |
| सुखम् |
| अप्रियं |
| परिश्रमेण |

(i) कदापि -------------------------- न वक्तव्यम्।

(ii) श्रेष्ठाः जनाः परहिताय -------------- त्यजन्ति।

(iii) -------------------------- कार्याणि सिध्यन्ति।

(iv) जनाः प्रियवाक्यैः -------------------- भवन्ति।

(v) सज्जनानां मित्रता -------------------- भवति।

3. उचितं पर्याय-शब्दं चित्वा लिखन्तु-

| |
|---|
| परिश्रमेण |
| भाषणे |
| सुजनः |
| संसारे |
| प्राणिनः |

(i) सज्जनः --------------------------

(ii) उद्यमेन --------------------------

(iii) जन्तवः --------------------------

(iv) वचने --------------------------

(v) लोके --------------------------



Scanned by CamScanner

4. **एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च –**

(i) के परोपकाराय सुखं त्यजन्ति? ------------------------------

(ii) कार्याणि केन सिध्यन्ति? ------------------------------

(iii) कीदृशं वचनम् वक्तव्यम्? ------------------------------

(iv) वचने का न भवेत्? ------------------------------

(v) का शीतला भवति? ------------------------------

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) मृगाः कुत्र न प्रविशन्ति?

------------------------------------------------------------

(ii) केषाम् वसुधैव कुटुम्बकं भवति?

------------------------------------------------------------

(iii) प्रियवाक्यप्रदानेन के तुष्यन्ति?

------------------------------------------------------------

(iv) सज्जनाः सदा कीदृशम् वदन्ति?

------------------------------------------------------------

(v) लोके चन्दनात् अपि शीतलं किं?

------------------------------------------------------------

6. **स्थूलपदानां स्थानेषु कोष्ठकात् उचितं पदं चित्वा प्रश्नवाक्यानि लिखन्तु वदन्तु च–**

(i) **मृगाः** सिंहस्य मुखे न प्रविशन्ति। (कः, काः, के )

------------------------------------------------------------

(ii) जन्तवः **प्रियवचनेन** तुष्यन्ति। (केन, कस्य, कस्मात्)

------------------------------------------------------------

(iii) लोके **चन्दनं** शीतलं भवति। (कम्, किम्, कः)

------------------------------------------------------------

(iv) चन्द्रमाः **चन्दनात्** अपि शीतलः भवति। (केषाम्, कस्मात्, कस्य)

------------------------------------------------------------

(v) **साधु-सङ्गतिः** चन्द्रचन्दनयोः मध्ये शीतला भवति। (का, कः, काः)

------------------------------------------------------------



Scanned by CamScanner

7. उचितं भावं (✓) इति चिह्नेन चिह्नितं कुर्वन्तु–

(क) लघुचेतसाम्–

(i) येषां हृदयं लघु भवति। ☐

(ii) येषां हृदयं विशालं भवति। ☐

(ख) सर्वे तुष्यन्ति जन्तवः–

(i) सर्वे प्राणिनः प्रसन्नाः भवन्ति। ☐

(ii) कोऽपि प्रसन्नः न भवति। ☐

(ग) शीतला साधुसङ्गतिः–

(i) सज्जनानाम् सङ्गतिः शीतं यच्छति। ☐

(ii) सज्जनानाम् सङ्गतिः सुखं यच्छति। ☐

## मूल्यात्मकः प्रश्नः

**श्लोकेषु युष्माभिः यत् पठितं तदनुसारं विचारयन्तु–**

(i) कीदृशाः जनाः अन्येभ्यः सुखं दातुं स्वयं कष्टं सहन्ते?

(ii) जनाः केन जीवने सफलतां प्राप्नुवन्ति?

(iii) ये जनाः सम्पूर्णं विश्वं स्वपरिवारः इव मन्यन्ते तेषां हृदयं कीदृशं भवति?

## गतिविधिः

**'मधुरं वचनम्' इति विषयम् अधिकृत्य पाठ्यपुस्तकात् भिन्नं कमपि श्लोकम् अन्विष्य पुस्तिकायां लिखन्तु कक्षायां च श्रावयन्तु।**



Scanned by CamScanner

## व्याकरणम्

# शब्दरूपाणि
## [Forms of Words—Nouns]

**अकारान्ताः पुल्लिङ्गे (अ-ending masculine gender)**

- **पश्यन्तु–**

राम = र् + आ + म् + अ

रमा = र् + अ + म् + आ

मति = म् + अ + त् + इ

गुरु = ग् + उ + र् + उ



- **अधुना एवमेव वर्णविन्यासं कुर्वन्तु–**

सूर्य – ------------------------------------

विद्यालय – ------------------------------------

सेवा – ------------------------------------

भूमि – ------------------------------------

भानु – ------------------------------------

कपोत – ------------------------------------

धरा – ------------------------------------

मुनि – ------------------------------------

साधु – ------------------------------------

- **अत्र वयम् पश्यामः यत् केषाञ्चित् शब्दानाम् अन्ते 'अ' अस्ति केषाञ्चित् शब्दानाम् अन्ते 'आ' केषाञ्चित् शब्दानाम् अन्ते 'इ' अस्ति अथवा 'उ' अस्ति। अधुना लिखन्तु यत्र-यत्र अन्ते–**

| 'अ' अस्ति | 'आ' अस्ति | 'इ' अस्ति | 'उ' अस्ति |
|---|---|---|---|
| ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- |
| (अकारान्ताः शब्दाः) | (आकारान्ताः शब्दाः) | (इकारान्ताः शब्दाः) | (उकारान्ताः शब्दाः) |



Scanned by CamScanner

■ अधुना पठन्तु पूरयन्तु च–

- प्रथमे वर्गे ये शब्दाः सन्ति तेषाम् अन्तिम-वर्णः 'अ' अस्ति। 'अ' 'अकारः' अपि कथ्यते। अतः एते शब्दाः -------------------- कथ्यन्ते।
- द्वितीये वर्गे ये शब्दाः सन्ति तेषाम् अन्तिम-वर्णः 'आ' अस्ति। 'आ' 'आकारः' अपि कथ्यते। अतः एते सर्वे शब्दाः -------------------- कथ्यन्ते।
- तृतीये वर्गे ये शब्दाः सन्ति तेषाम् अन्तिम-वर्णः 'इ' अस्ति। 'इ' 'इकारः' अपि कथ्यते। अतः एते सर्वे शब्दाः -------------------- कथ्यन्ते।
- चतुर्थे वर्गे ये शब्दाः सन्ति तेषाम् अन्तिम-वर्णः 'उ' अस्ति। 'उ' 'उकारः' अपि कथ्यते। अतः एते सर्वे शब्दाः -------------------- कथ्यन्ते।

संस्कृत-भाषायाम् यदा शब्दानाम् प्रयोगः वाक्येषु भवति तदा तेषाम् स्वरूपे परिवर्तनम् भवति। एतत् परिवर्तनं **'शब्दरूप** इति। कथ्यते। वयं जानीमः यत् संस्कृते त्रीणि वचनानि भवन्ति। अकारान्त-शब्दस्य, आकारान्त-शब्दस्य, इकारान्त-शब्द रूपाणि पृथक्-पृथक् भवन्ति।

■ **अकारान्त-पुल्लिङ्ग-शब्दस्य रूपाणि अधोलिखितानि सन्ति। ध्यानेन पठन्तु अवगच्छन्तु आदर्शरूपेण ''बालक'' शब्दस्य रूपाणि दत्तानि।**

**अकारान्ताः पुल्लिङ्गे (अ-ending masculine gender)**

**बालक**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधनम् | हे बालक! | हे बालकौ! | हे बालकाः! |



Scanned by CamScanner

# अभ्यासः

1. गतपृष्ठे बालक शब्दस्य लिखितानि रूपाणि दृष्ट्वा अधोलिखित-शब्दान् विभक्ति-वचन-अनुसारं लिखन्तु पठन्तु च–

शिष्येषु, कपोताभ्याम्, कपोतेन, शिष्याः, बालकः, आविष्कारकौ, विद्यालयात्, बालकस्य, नगरे, बुद्धिहीनाभ्याम्, देवाः, शिष्यान्, शरीरयोः, हे शिष्याः!, हे वत्स!, वैज्ञानिकः, आचार्यैः, आहतेभ्यः, वीराणाम्, हस्तौ, क्षेत्रयोः, भोजनाय, मंगलाभ्याम्, मधुरेभ्यः, हरिणम्, सज्जनौ, हे बालकौ!

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | हस्तौ | शिष्याः |
| द्वितीया | -------------------- | -------------------- | -------------------- |
| तृतीया | -------------------- | -------------------- | -------------------- |
| चतुर्थी | -------------------- | -------------------- | -------------------- |
| पञ्चमी | -------------------- | -------------------- | -------------------- |
| षष्ठी | -------------------- | -------------------- | -------------------- |
| सप्तमी | -------------------- | -------------------- | -------------------- |
| सम्बोधनम् | -------------------- | -------------------- | -------------------- |

- अकारान्ताः शब्दाः द्विविधाः भवन्ति पुल्लिङ्गाः नपुंसकलिङ्गाः च।
- पुल्लिङ्गाः शब्दाः यथा– नर, गज, राम, शिष्य, कपोत, वैज्ञानिक आदयः।
- नपुंसकलिङ्गाः शब्दाः यथा– फल, पुष्प, पुस्तक, कार्य आदयः।



Scanned by CamScanner

## अकारान्ताः नपंसकुलिङ्गे (अ-ending neuter gender)

### फल

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधनम् | हे फल! | हे फले! | हे फलानि! |

- सर्वेषाम् नपुंसकलिङ्ग–शब्दानां तृतीयाविभक्तेः सप्तमीविभक्तिपर्यन्तं रूपाणि पुल्लिङ्गवत् एव भवन्ति।
- अधुना 'फल' शब्दस्य रूपाणि इव 'पुस्तक, पुष्प, कार्य' एतेषां शब्दानां रूपाणि अभ्यासपुस्तिकायां लिखन्तु।

## अभ्यासः

**1. प्रत्येकं वाक्यस्य समक्षम् कोष्ठके द्वे पदे दत्ते। उचित-पदं चित्वा रिक्तस्थानानि पूरयन्तु–**

उदाहरणम्– नरः **भोजनेन** जीवति।
(भोजनस्य, भोजनेन)



(i) नरः ------------------- उद्यानम् गच्छति।
(भ्रमणाय, भ्रमणेन)





(ii) आचार्यः ------------------- पुरस्कारम् यच्छति।
(शिष्याय, शिष्यात्)



Scanned by CamScanner

(iii) मालाकारः -------------------- पुष्पाणि आनयति।
(उद्यानम्, उद्यानात्)





(iv) बालकः -------------------- निपुणः अस्ति।
(पठने, पठनात्)

**आकारान्ताः स्त्रीलिङ्गे (आ–ending feminine gender)**

■ **वर्णविन्यासे रिक्तस्थानं पूरयन्तु–**

लता = ल् + अ + त् + ----------------

धरा = ध् + अ + र् ----------------

महिला = म् + अ + ह् + इ + ल् + ----------------

निशा = न् + इ + श् + ----------------

शिक्षिका = श् + इ + क् + ष् + इ + क् + ----------------

■ **एतेषां शब्दानाम् अन्ते (आ) वर्णः अस्ति। अतः एते शब्दाः आकारान्ताः सन्ति।**

यथा–

| | | | | |
|---|---|---|---|---|
| वीरबालिका | आजीविका | अजा | मार्गदर्शिका | श्रद्धा |
| शिखा | विमानचालिका | शाखा | शोभा | अम्बा |
| अध्यापिका | शोभना | धारा | कृपा | बालिका |

❖ येषाम् शब्दानाम् अन्ते 'आकारः' भवति ते सर्वे एव शब्दाः 'आकारान्ताः' भवन्ति। उपरि लिखिताः सर्वे एव शब्दाः आकारान्ताः स्त्रीलिङ्गाः सन्ति।



Scanned by CamScanner

## आकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि एवं भवन्ति।

### लता

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधनम् | हे लते! | हे लते! | हे लताः! |

एतानि रूपाणि ध्यानेन पठन्तु वदन्तु च। येषाम् शब्दानाम् अन्तिमः वर्णः 'आ' भवति लिङ्गं च स्त्रीलिङ्गं भवति तेषाम् रूपाणि लतावत् एव भवन्ति।

## अभ्यासः

1. 'लता' शब्दस्य उपरिलिखितानि रूपाणि अधिकृत्य अधोलिखित-शब्दानाम् यथानिर्दिष्टम् रूपाणि लिखन्तु-

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| शिक्षिका | प्रथमा | ---------- | ---------- | ---------- |
| मार्गदर्शिका | द्वितीया | ---------- | ---------- | ---------- |
| आजीविका | तृतीया | ---------- | ---------- | ---------- |
| धरा | चतुर्थी | ---------- | ---------- | ---------- |
| विमानचालिका | पञ्चमी | ---------- | ---------- | ---------- |
| मधुरा | षष्ठी | ---------- | ---------- | ---------- |
| श्रद्धा | सप्तमी | ---------- | ---------- | ---------- |
| महिला | सम्बोधनम् | ---------- | ---------- | ---------- |



Scanned by CamScanner

2. **अधोलिखितवाक्येषु अकारान्त-पुल्लिङ्ग-शब्दानाम् स्थाने आकारान्त-स्त्रीलिङ्ग-शब्दानां प्रयोगं कुरुत–**

उदाहरणम्– **गजौ** धावतः।

**गजे** धावतः। (गजा)



(i) **चटकः** आकाशे उत्पतति।

-------------------- आकाशे उत्पतति। (चटका)

(ii) शिष्यः **विद्यालयं** गच्छति।

शिष्यः -------------------- गच्छति। (पाठशाला)

(iii) श्रीकृष्णः **गोपैः** सह क्रीडति।

श्रीकृष्णः -------------------- सह क्रीडति। (गोपिका)

(iv) मालाकारः **हारेभ्यः** पुष्पाणि आनयति।

मालाकारः -------------------- पुष्पाणि आनयति। (माला)

(v) पत्राणि **वृक्षात्** पतन्ति।

पत्राणि -------------------- पतन्ति। (लता)



(vi) एतत् तु मम **जनकस्य** पुस्तकम् अस्ति।

एतत् तु मम -------------------- पुस्तकम् अस्ति। (अम्बा)

(vii) **उद्याने** पुष्पाणि विकसन्ति।

-------------------- पुष्पाणि विकसन्ति। (वाटिका)

(viii) हे **राम!** त्वम् कुत्र असि?

-------------------- त्वम् कुत्र असि? (सीता)






Scanned by CamScanner

# कारकस्य परिचयः
## [Introduction to Cases]

### पठन्तु अवगच्छन्तु च–

(i) **छात्रः** पठति।

(ii) छात्रः **पाठम्** पठति।

(iii) छात्रः **कलमेन** लिखति।

(iv) छात्रः **भिक्षुकाय** भोजनं यच्छति।

(v) छात्रः **विद्यालयात्** आगच्छति।

(vi) छात्रः **संस्कृतस्य** पुस्तकं पठति।

(vii) छात्रः **क्रीडाक्षेत्रे** क्रीडति।

(viii) छात्रः मित्रं कथयति- **हे देव!** आगच्छ क्रीडावः।

### उपरिलिखितेषु वाक्येषु सर्वेषु स्थूलपदेषु पृथक्-पृथक् विभक्तिः अस्ति।

**यथा–**

- प्रथमे वाक्ये 'छात्रः' अस्ति। एतस्मिन् शब्दे प्रथमा विभक्तिः अस्ति। कारणम्-छात्रः पठनस्य कार्यं करोति अर्थात् कर्तृकारकम् अस्ति। कर्तृकारके च प्रथमा विभक्तिः भवति।
- द्वितीये वाक्ये 'पाठम्' इति पदे द्वितीया विभक्तिः अस्ति। कारणम्-क्रियायाः प्रभावः'पाठस्य' उपरि भवति अतः 'पाठम्' इति पदं कर्मकारकम् अस्ति। कर्मकारके च द्वितीया विभक्तिः भवति।
- तृतीये वाक्ये लेखनस्य साधनं 'कलमम्' अस्ति। अतः 'कलमेन' इति पदे करणकारकम् अस्ति। येन साधनेन क्रिया भवति तत्र करणकारकं भवति। करणकारके च तृतीया विभक्तिः भवति।
- चतुर्थे वाक्ये 'भिक्षुकाय' इति पदे चतुर्थी विभक्तिः अस्ति। यतः यस्मै कार्यं क्रियते अथवा यस्मै किमपि दीयते तत्र सम्प्रदानकारकं भवति तस्मिन् च चतुर्थी विभक्तिः भवति।
- पञ्चमे वाक्ये 'विद्यालयात्' इति पदे पञ्चमी विभक्तिः अस्ति। यस्मात् स्थानात् कोऽपि अथवा किमपि पृथक् भवति। तत्र अपादानकारकं भवति तस्मिन् च पञ्चमी विभक्तिः भवति।
- षष्ठे वाक्ये 'संस्कृतस्य' इति पदे षष्ठी विभक्तिः अस्ति। यस्य येन सह सम्बन्धःभवति तत्र सम्बन्धकारकं भवति। तस्मिन् च षष्ठी विभक्तिः भवति।
- सप्तमे वाक्ये 'क्रीडाक्षेत्रे' इति पदे सप्तमी विभक्तिः अस्ति। यस्मिन् स्थाने क्रिया भवति तत्र अधिकरणकारकं भवति। तस्मिन् च सप्तमी विभक्तिः भवति।
- अष्टमे वाक्ये 'हे देव!' इति पदे सम्बोधनम् अस्ति। यदा कश्चित् कमपि सम्बोधयति तस्मिन् सम्बोधनम् भवति।



Scanned by CamScanner

■ पठन्तु स्मरन्तु च–

**कारकम्**

| कारकम् | विभक्तिः | चिह्नम् |
|---|---|---|
| कर्ता | प्रथमा | ने (यः क्रियां करोति) |
| कर्म | द्वितीया | को (यत्र क्रियायाः प्रभावः भवति।) |
| करणम् | तृतीया | से/के द्वारा (येन साधनेन क्रिया भवति) |
| सम्प्रदानम् | चतुर्थी | को/के लिए (यस्मै क्रिया भवति) |
| अपादानम् | पञ्चमी | से (पृथक् इति अर्थे) (यस्मात् पृथक् भवति) |
| सम्बन्धः | षष्ठी | का/के/की/रा/रे/री (यस्य येन सह सम्बन्धः भवति) |
| अधिकरणम् | सप्तमी | में/पर (यत्र क्रिया भवति) |
| सम्बोधनम् | सम्बोधनम् | हे/भो/अरे (यस्य सम्बोधनं भवति) |

## अभ्यासः

1. कोष्ठकात् उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयन्तु–

(i) बालः ------------------------------------ पठति। (पुस्तकम्, पुस्तकेन)

(ii) ------------------------------------ पत्राणि पतन्ति। (वृक्षस्य, वृक्षात्)

(iii) बालकाः ------------------------------- क्रीडन्ति। (पादकन्दुकम्, पादकन्दुकेन)

(iv) सः ---------------------------- जलम् आनयति। (जनकाय, जनकस्य)

(v) -------------------------------------------- भ्रमन्ति। (जनः, जनाः)

(vi) -------------------------------- त्वम् कुत्र गच्छसि? (हे राम!, हे रामौ)

(vii) -------------------------------- द्वौ पुत्रौ आस्ताम्। (रामम्, रामस्य)

(viii) सः अस्मिन् ---------------------------- पठति। (विद्यालयम्, विद्यालये)

******



Scanned by CamScanner

# जले अपि वसन्ति जीवाः

**पञ्चमः पाठः**

अध्यापिका – छात्राः! **आगच्छत, अद्य** वयं समुद्रतटं चलामः।

(**हर्षिताः** छात्राः समुद्रतटं गच्छन्ति)

सागरः – मित्राणि! तत्र **पश्यत**। जले **वहवः विचित्राः** जन्तवः सन्ति।



सर्वे – आम्। वयं पश्यामः।

श्रुतिः – अरे! तत्र एकः **मत्स्यः दीव्यति**।

शैलेशः – आम्। सः कः मत्स्यः अस्ति?

अध्यापिका – अयं **स्वर्णिमः** मत्स्यः अस्ति। अस्य वर्णः स्वर्णसदृशः भवति। अतः सः दीव्यति।

मीनाक्षी – अयं सुन्दरः मत्स्यः अस्ति।

मोहितः – 'टर्र टर्र' इति कस्य ध्वनिः जलात् आगच्छति?

अध्यापिका – अयम् **मण्डूकः** अस्ति।



सागरः – किम् मण्डूकः जले वसति?

अध्यापिका – मण्डूकः तु जले भूमौ च **उभयत्र** वसति।

श्रुतिः – **अन्ये** के के जन्तवः जले **भूमौ** च उभयत्र वसन्ति?

अध्यापिका – कच्छपः **कुलीरः** च जले भूमौ च उभयत्र वसतः।

(एकः **विशालकायः** मत्स्यः जलस्य उपरि आगच्छति)



सागरः – अस्य मत्स्यस्य किं नाम अस्ति?

अध्यापिका – अस्य नाम 'शार्क' अस्ति।

श्रुतिः – अयं किं किं खादति?

अध्यापिका – अयं **लघुमत्स्यान्** खादति।

शैलेशः – अयं **मानवान्** अपि खादति।

अध्यापिकाः – आम्! अयम् अति बलवान् मत्स्यः भवति।

मोहितः – **समुद्रे** तु बहवः जन्तवः वसन्ति।



अध्यापिका – आम्। एते जन्तवः मिलित्वा एव समुद्रे वसन्ति।

## शब्दार्थाः Word-Meaning

| | | |
|---|---|---|
| आगच्छत | आओ | come |
| अद्य | आज | today |
| हर्षिताः | प्रसन्न | happy |
| पश्यत | देखो | see |
| बहवः | बहुत से | many |
| विचित्राः | कई तरह के | of many types |
| मत्स्यः | मछली | fish |
| दीव्यति | चमकती है | shines |
| स्वर्णिमः | सुनहरी | golden |
| मण्डूकः | मेंढक | frog |
| उभयत्र | दोनों जगह | on both places |
| अन्ये | और, दूसरे | others |
| भूमौ | पृथ्वी पर | on earth |
| कुलीरः | केकड़ा | a crab |
| विशालकायः | बहुत बड़े शरीर वाला | very big |
| लघुमत्स्यान् | छोटी मछलियों को | small fishes |
| मानवान् | मनुष्यों को | human beings |
| समुद्रे | समुद्र में | in the sea |



Scanned by CamScanner

## अभ्यासः

1. **एतानि कथनानि शुद्धानि अशुद्धानि वा इति वदन्तु लिखन्तु च–**

(i) शार्क-मत्स्यः दीव्यति। ---अशुद्धम्---

(ii) स्वर्णिमः मत्स्यः जले भूमौ च उभयत्र वसति। ----------------

(iii) जले बहवः विचित्राः जन्तवः वसन्ति। ----------------

(iv) मण्डूकः 'टर्र-टर्र' इति ध्वनिं करोति। ----------------

(v) शार्कः बलवान् मत्स्यः भवति। ----------------

(vi) छात्राः समुद्रतटं गच्छन्ति। ----------------

2. **मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयन्तु–**

| मञ्जूषा |
|---|
| मत्स्यः |
| मण्डूकः |
| समुद्रे |
| स्वर्णसदृशः |
| मानवान् |

(i) एते जन्तवः मिलित्वा -------------- वसन्ति।

(ii) तत्र एकः -------------- दीव्यति।

(iii) अयम् शार्कः -------------- अपि खादति।

(iv) -------------- तु जले भूमौ च उभयत्र वसति।

(v) स्वर्णिमः मत्स्यः -------------- भवति।

3. **उचित-पर्यायपदं चित्वा लिखन्तु–**

| मञ्जूषा |
|---|
| सागरः |
| मीनः |
| प्रसन्नाः |
| मनुष्यः |
| जीवः |

(i) जन्तुः --------------------------

(ii) समुद्रः --------------------------

(iii) मत्स्यः --------------------------

(iv) मानवः --------------------------

(v) हर्षिताः --------------------------



Scanned by CamScanner

4. **एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) मानवान् कः खादति? (शार्कः मत्स्यः, मण्डूकः) --------------------------------

(ii) हर्षिताः छात्राः कुत्र गच्छन्ति? (जन्तुशालां, समुद्रतटं) --------------------------------

(iii) कः जले भूमौ च उभयत्र वसति? (कच्छपः, मत्स्यः) --------------------------------

(iv) विशालकाय-मत्स्यस्य किं नाम अस्ति? (शार्कः, स्वर्णिमः) --------------------------------

(v) समुद्रस्य जन्तवः कथम् वसन्ति? (मिलित्वा, भ्रमित्वा) --------------------------------

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च–**

(i) जले कीदृशाः जन्तवः सन्ति?

--------------------------------------------------------------------------------

(ii) समुद्रस्य जले कः दीव्यति?

--------------------------------------------------------------------------------

(iii) 'शार्क' इति मत्स्यः किम् किम् खादति?

--------------------------------------------------------------------------------

(iv) जले मिलित्वा के वसन्ति?

--------------------------------------------------------------------------------

(v) मण्डूकः कुत्र वसति?

--------------------------------------------------------------------------------

6. **स्थूलपदानां स्थानेषु कोष्ठकात् उचितं प्रश्नवाचकपदं चित्वा प्रश्नवाक्यानि वदन्तु लिखन्तु च–**

(i) छात्राः **समुद्रतटं** गच्छन्ति। (कदा, कुत्र, कस्मिन्)

--------------------------------------------------------------------------------

(ii) अयं **मण्डूकः** अस्ति। (कः, का, किम्)

--------------------------------------------------------------------------------

(iii) एकः मत्स्यः **जलस्य** उपरि आगच्छति। (केन, कस्य, कस्मात्)

--------------------------------------------------------------------------------

(iv) शार्कः **लघुमत्स्यान्** खादति। (किम्, कानि, कान्)

--------------------------------------------------------------------------------

(v) समुद्रे बहवः **जन्तवः** वसन्ति। (काः, के, कानि)

--------------------------------------------------------------------------------



Scanned by CamScanner

## मूल्यात्मकः प्रश्नः

अस्मिन् पाठे भवन्तः विभिन्न-जन्तूनाम् विषये अपठन्।

अस्माभिः एतेषाम् जन्तूनाम् रक्षणम् करणीयम्। भवन्तः जीवानां रक्षणाय किं-किं कर्तुम् इच्छन्ति?

## गतिविधिः

भवताम् प्रियः पशुः कः अस्ति? तस्य चित्रं निर्माय सुन्दरवर्णैः रञ्जयत–



Scanned by CamScanner

# वचनम्
**[Numbers]**



यदा एकवस्तु भवति तदा
एकवचनम्



यदा अनेकवस्तूनि भवन्ति तदा
बहुवचनम्



एकः वानरः उपविशति।



त्रयः वानराः उपविशन्ति।



एकः खगः अस्ति।



चत्वारः खगाः सन्ति।



Scanned by CamScanner



एकः वालः क्रीडति।



अनेके बालाः क्रीडन्ति।



एकः मयूरः नृत्यति।



पञ्च मयूराः नृत्यन्ति।



एकः शशकः धावति।



षट् शशकाः धावन्ति।



Scanned by CamScanner

# अभ्यासः

पश्यन्तु एतत् चित्रम्। किम् कुर्वन्ति एते?



1. अधुना एतानि वाक्यानि पठित्वा एतेषाम् वचनम् लिखन्तु–

यथा– वानरः फलम् खादति। ------एकवचनम्------

(i) खगाः आकाशे उड्डयन्ति। ----------------------

(ii) बालाः उद्याने क्रीडन्ति। ----------------------

(iii) बालिका तिष्ठति, पठति च। ----------------------

(iv) मयूरः नृत्यति। ----------------------

(v) बालकाः धावन्ति। ----------------------

2. क्रियारूपाणां वचनपरिवर्तनम् कृत्वा लिखन्तु–

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा– | अस्ति | सन्ति |
| | भवति | ---------------- |
| | ---------------- | वसन्ति |
| | ---------------- | गच्छन्ति |



Scanned by CamScanner



| | |
|---|---|
| तिष्ठति | ---------------- |
| ---------------- | वदन्ति |
| भ्रमति | ---------------- |
| ---------------- | हसन्ति |
| पिबति | ---------------- |
| ---------------- | पश्यन्ति |
| चलति | ---------------- |
| ---------------- | नृत्यन्ति |
| खादति | ---------------- |
| ---------------- | प्रविशन्ति |





3. **वाक्यानि पठन्तु–**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः पठति | तौ पठतः | ते पठन्ति |
| सा पठति | ते पठतः | ताः पठन्ति |
| त्वम् पठसि | युवाम् पठथः | यूयम् पठथ |
| अहम् पठामि | आवाम् पठावः | वयम् पठामः |

**अधुना लिखन्तु–**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| ---------------- लिखति | ---------------- लिखतः | ---------------- लिखन्ति |
| ---------------- लिखति | ---------------- लिखतः | ---------------- लिखन्ति |
| ---------------- लिखसि | ---------------- लिखथः | ---------------- लिखथ |
| ---------------- लिखामि | ---------------- लिखावः | ---------------- लिखामः |



Scanned by CamScanner

4. **उदाहरणं दृष्ट्वा क्रियारूपाणि रचयन्तु–**

| | |
|---|---|
| भ्रम् + अति ------भ्रमति------ | लिख् + आमि ---------------- |
| चल् + अन्ति ---------------- | खाद् + आमः ---------------- |
| वस् + अतः ---------------- | धाव् + अथः ---------------- |
| नम् + असि ---------------- | रक्ष् + आमः ---------------- |
| पठ् + अथ ---------------- | गच्छ् + अति ---------------- |

## धातुरूपाणि
## [Verb–Forms]

■ **अधोलिखितानि धातुरूपाणि पठन्तु लिखन्तु च–**

**लट् लकारः (Present Tense, वर्तमानकालः)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमः पुरुषः (Third Person)** | पठति ---------------- | पठतः ---------------- | पठन्ति ---------------- |
| **मध्यमः पुरुषः (Second Person)** | पठसि ---------------- | पठथः ---------------- | पठथ ---------------- |
| **उत्तमः पुरुषः (First Person)** | पठामि ---------------- | पठावः ---------------- | पठामः ---------------- |

**ध्यातव्यम्–**

- एतानि धातुरूपाणि वर्तमानकालस्य क्रियापदानि सन्ति।
- वर्तमानकाले **'लट्लकारस्य'** प्रयोगः भवति।



Scanned by CamScanner

## अभ्यासः

**1. एतानि वाक्यानि पठन्तु लिखन्तु च–**

| | | | |
|---|---|---|---|
| सः पठति | -------------- सः पठति -------------- | ते पठन्ति | ------------------------------ |
| सा पठति | ------------------------------ | ताः पठन्ति | ------------------------------ |
| एषः पठति | ------------------------------ | एते पठन्ति | ------------------------------ |
| एषा पठति | ------------------------------ | एताः पठन्ति | ------------------------------ |
| त्वम् पठसि | ------------------------------ | यूयम् पठथ | ------------------------------ |

**2. उदाहरणानुसारं लट्लकारे वाक्यानि रचयन्तु–**

| | एकवचनम् | वहुवचनम् |
|---|---|---|
| चल् (चलना, to walk) | सः चलति | ते चलन्ति |
| खाद् (खाना, to eat) | सा -------------------- | ताः -------------------- |
| खेल् (खेलना, to play) | त्वम् -------------------- | -------------------- |
| गम् (गच्छ्) (जाना, to go) | अहम् -------------------- | -------------------- |
| नम् (झुकना, to bow) | एषः -------------------- | -------------------- |
| स्था (तिष्ठ्) (ठहरना, to stay) | एषा -------------------- | -------------------- |
| हस् (हँसना, to laugh) | त्वम् -------------------- | -------------------- |
| लिख् (लिखना, to write) | अहम् -------------------- | -------------------- |
| धाव् (भागना, to run) | सः -------------------- | -------------------- |
| वद् (बोलना, to speak) | -------------------- वदामि | -------------------- वदामः |
| दृश् (पश्य्) (देखना, to see) | -------------------- पश्यामि | -------------------- |
| पत् (गिरना, to fall) | -------------------- पतसि | -------------------- |
| उपविश् (बैठना, to sit) | -------------------- उपविशति | -------------------- उपविशन्ति |
| पा (पिब्) (पीना, to drink) | सा -------------------- | -------------------- |
| भ्रम् (घूमना, to walk) | एषा -------------------- | -------------------- |



Scanned by CamScanner

# अन्यानि धातुरूपाणि

## लट् लकारः

■ 'भ्रम्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | भ्रमति | भ्रमतः | भ्रमन्ति |
| मध्यमः | भ्रमसि | भ्रमथः | भ्रमथ |
| उत्तमः | भ्रमामि | भ्रमावः | भ्रमामः |

■ 'स्था' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यमः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तमः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

■ 'पा' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | पिबति | पिबतः | पिबन्ति |
| मध्यमः | पिबसि | पिबथः | पिबथ |
| उत्तमः | पिबामि | पिबावः | पिबामः |

■ 'नृत्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | नृत्यति | नृत्यतः | नृत्यन्ति |
| मध्यमः | नृत्यसि | नृत्यथः | नृत्यथ |
| उत्तमः | नृत्यामि | नृत्यावः | नृत्यामः |

■ 'गम्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमः | गच्छामि | गच्छावः | गच्छामः |



Scanned by CamScanner

■ 'दृश्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमः | पश्यामि | पश्यावः | पश्यामः |

■ संस्कृतभाषायां द्विवचनस्य अपि प्रयोगः भवति। अधुना पठन्तु अवगच्छन्तु लिखन्तु च।

**द्विवचनम्, प्रथमः पुरुषः**

| | | | |
|---|---|---|---|
| तौ [वे दो, They both (पु०)] | बालकौ | पठतः। | (पठ्) |
| तौ | -------------------- | -------------------- | |
| ते [वे दो, They both (स्त्री०)] | बालिके | पठतः। | (पठ्) |
| ते | -------------------- | -------------------- | |
| तौ | -------------------- | -------------------- | (चल्) |
| ते | -------------------- | -------------------- | (चल्) |
| एतौ [ये दो, These two (पु०)] | -------------------- | -------------------- | (नम्) |
| एते [ये दो, These two (स्त्री०)] | -------------------- | -------------------- | (नम्) |
| -------------------- | बालकौ | -------------------- | (हस्) |
| -------------------- | बालिके | -------------------- | (हस्) |

**द्विवचनम्, मध्यमः पुरुषः**

| | | |
|---|---|---|
| युवाम् --------पठथः-----------। (पठ्) | | |
| युवाम् --------चलथः-----------। (चल्) | ------------------------ | उपविशथः। |
| युवाम् ---------------------------। (खाद्) | ------------------------ | हसथः। |
| युवाम् ---------------------------। (नम्) | ------------------------ | नमथः। |
| युवाम् ---------------------------। (भ्रम्) | ------------------------ | वदथः। |



Scanned by CamScanner

## द्विवचनम्, उत्तमः पुरुषः

| | | | |
|---|---|---|---|
| आवाम् | ............पठावः............ । (पठ्) | | |
| आवाम् | ............खादावः............ । (खाद्) | ........................ | उपविशावः। |
| आवाम् | ........................ । (नम्) | ........................ | हसावः। |
| आवाम् | ........................ । (चल्) | ........................ | नमावः। |
| आवाम् | ........................ । (भ्रम्) | ........................ | वदावः। |

## अभ्यासः

1. उदाहरणानुसारम् उचितरूपैः रिक्तस्थानानि पूरयन्तु–

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः गच्छति। | ........................ । | ........................ । |
| सा ........................। | ते गच्छतः। | ताः ........................। |
| त्वम् खादसि। | ........................ । | ........................ । |
| ........................। | आवाम् ..................। | .................. नमामः। |
| एषः बालकः ..............।. | .................. क्रीडतः। | ........................ । |
| एषा चटका कूजति। | एते चटके .............. । | ........................ । |

## अस् (होना, To be)

### लट् लकारः (है/हैं; is, are)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अस्ति | स्तः | सन्ति |
| मध्यमः | असि | स्थः | स्थ |
| उत्तमः | अस्मि | स्वः | स्मः |



Scanned by CamScanner

■ वाक्यानि पठन्तु–

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | सः बालकः अस्ति। | तौ बालकौ स्तः। | ते बालकाः सन्ति। |
| | सा बालिका अस्ति। | ते बालिके स्तः। | ताः बालिकाः सन्ति। |
| | एषः बालकः अस्ति। | एतौ बालकौ स्तः। | एते बालकाः सन्ति। |
| | एषा बालिका अस्ति। | एते बालिके स्तः। | एताः बालिकाः सन्ति। |
| मध्यमः पुरुषः | त्वम् बालकः असि। | युवां बालकौ स्थः। | यूयं बालकाः स्थ। |
| | त्वम् बालिका असि। | युवां बालिके स्थः। | यूयं बालिकाः स्थ। |
| उत्तमः पुरुषः | अहं बालकः अस्मि। | आवां बालकौ स्वः। | वयं बालकाः स्मः। |
| | अहं बालिका अस्मि। | आवां बालिके स्वः। | वयं बालिकाः स्मः। |

## पुल्लिङ्गम्
**[Masculine Gender]**

1. **चित्राणि पश्यन्तु वाक्यानि पठन्तु–**



← (i) एषः विडालः अस्ति।

(ii) सः चन्द्रः अस्ति। →





← (iii) एतौ बालकौ गच्छतः।



Scanned by CamScanner

(iv) तौ शुकौ स्तः। →





← (v) एते वानराः सन्ति।

(vi) ते बालकाः क्रीडन्ति। →



## अभ्यासः

**1. उदाहरणं दृष्ट्वा उचितैः पदैः रिक्तस्थानानि पूरयन्तु–**

(i) एषः कः अस्ति? (एतत्)

(ii) एषः ------------------ अस्ति।





(iii) -------------- कौ स्तः? (तत्)

(iv) तौ -------------- स्तः।



(v) एते -------------- पठन्ति? (किम्)

(vi) एते -------------- पठन्ति?



Scanned by CamScanner

2. उचितं रूपं चित्वा रिक्तस्थानानि पूरयन्तु–

(i) -------बालाः------- क्रीडन्ति। (बालः, बालौ, बालाः)

(ii) -------------------- पठतः। (छात्रः, छात्रौ, छात्राः)

(iii) -------------------- भ्रमन्ति। (जनः, जनौ , जनाः)

(iv) -------------------- नमति। (भक्तः, भक्तौ, भक्ताः)

(v) -------------------- नृत्यतः। (मयूरः, मयूरौ, मयूराः)

(vi) -------------------- गर्जति। (सिंहः, सिंहौ, सिंहाः)

******



Scanned by CamScanner

# वीरबालिका गुञ्जनसक्सेना

षष्ठः पाठः



अस्माकं भारतमाता वीराणां जननी अस्ति। **अनेके** वीरबालकाः वीरबालिकाः च भारतभूमौ **उत्पन्नाः अभवन्**। गुञ्जनसक्सेना अपि **एतादृशी** एका **वीरबालिका** उत्पन्ना अभवत्। मातृभूमेः **सेवायै** सा स्वजीवनस्य चिन्तां न अकरोत्। सा 'डी.ए.वी.' इति संस्थायाः हंसराज-**महाविद्यालयस्य** छात्रा आसीत्। **मातृभूमेः सेवार्थं** सा भारतीय-वायुसेनां **प्राविशत्**। सा **प्रथमा** भारतीया महिला **विमान-चालिका** आसीत्। सा वीराङ्गना **राज्ञी** लक्ष्मीबाई इव **साहसिनी** आसीत्। सा **युद्धक्षेत्रे निर्भयं** विमानम् अचालयत्। सा **सैनिकेभ्यः** आवश्यकवस्तूनां **वितरणम्** अकरोत्। सा **रुग्णान् आहतान्** च सैनिकान् **अरक्षत्**। एषा वीरबालिका कर्तव्यपालनस्य **उच्चादर्शम् अस्थापयत्**। वयं सर्वे एतां वीरबालिकां सदैव **स्मरिष्यामः**।

धन्या एषा वीरबालिका।





Scanned by CamScanner

## शब्दार्था : Word-Meaning

| | | |
|---|---|---|
| अनेके | बहुत से | many |
| उत्पन्नाः अभवन् | पैदा हुए | took birth |
| एतादृशी | ऐसी | like this (her) |
| वीरबालिका | वीर लड़की | brave girl |
| सेवायै | सेवा के लिए | for the service |
| महाविद्यालयस्य | महाविद्यालय की | of college |
| मातृभूमेः | मातृभूमि की | of motherland |
| सेवार्थं | सेवा के लिए | for the service |
| प्राविशत् | प्रवेश लिया | entered |
| प्रथमा | पहली | first |
| विमान-चालिका | वायुयान चलाने वाली | (lady) pilot |
| राज्ञी | रानी | queen |
| साहसिनी | साहस वाली | full of courage |
| युद्धक्षेत्रे | युद्ध के मैदान में | in the battle field |
| निर्भयं | बिना डर के | without fear |
| सैनिकेभ्यः | सैनिकों के लिए | for army people |
| वितरणम् | बाँटना | distribution |
| रुग्णान् | रोगियों को | sick |
| आहतान् | चोट लगे | wounded |
| अरक्षत् | रक्षा की | protected |
| उच्चादर्शम् | उच्च नमूना | great ideal |
| अस्थापयत् | स्थापित किया | instilled |
| स्मरिष्यामः | (हम) याद करेंगे | (we) will remember |



Scanned by CamScanner

## अभ्यासः

1. कथनानि पठित्वा 'आम्' अथवा 'न' कथयन्तु लिखन्तु च–

   (i) भारतमाता वीराणां जननी अस्ति। ------आम्-------

   (ii) गुञ्जनसक्सेना वीरबालिका आसीत्। ------------------

   (iii) गुञ्जनसक्सेना मातृभूमेः सेवार्थं स्वजीवनस्य चिन्ताम् अकरोत्। ------------------

   (iv) गुञ्जनसक्सेना 'डी.ए.वी.' इति संस्थायाः छात्रा आसीत्। ------------------

   (v) गुञ्जनसक्सेना द्वितीया भारतीया महिलाविमानचालिका आसीत्। ------------------

   (vi) गुञ्जनसक्सेना निर्भयं विमानम् अचालयत्। ------------------

2. मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयन्तु–

   (i) ------------------ एका वीरबालिका आसीत्।

   (ii) सा -------------- प्राविशत्।

   (iii) सा प्रथमा भारतीया महिला ---------------- आसीत्।

   (iv) सा ------------------ आवश्यकवस्तूनां वितरणम् अकरोत्।

   (v) सा बालिका ---------------- स्मरणीया।

| |
|---|
| सदैव |
| वायुसेनां |
| गुञ्जनसक्सेना |
| विमानचालिका |
| सैनिकेभ्यः |

3. उचितं विपरीतपदं चित्वा लिखन्तु–

   (i) जननी ---------------------------

   (ii) वीरबालिका ---------------------------

   (iii) छात्रा ---------------------------

   (iv) महिला ---------------------------

   (v) वीराङ्गना ---------------------------

| |
|---|
| वीरबालकः |
| पुरुषः |
| वीरः |
| छात्रः |
| जनकः |



Scanned by CamScanner

4. पाठं पठित्वा एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च-

(i) भारतमाता केषाम् जननी अस्ति। (वीराणाम्, पुरुषाणाम्)

...............................................

(ii) गुञ्जनसक्सेना कस्य चिन्तां न अकरोत्? (स्वधनस्य, स्वजीवनस्य)

...............................................

(iii) सा वीरबालिका किमर्थम् वायुसेनाम् प्राविशत्? (मातृभूमेः सेवार्थं, स्वमनोरञ्जनाय)

...............................................

(iv) गुञ्जनसक्सेना निर्भयं किम् अचालयत्? (विमानम्, बसयानम्)

...............................................

(v) गुञ्जनसक्सेना कस्य उच्चादर्शम् अस्थापयत्? (धनसङ्ग्रहस्य, कर्तव्यपालनस्य)

...............................................

5. एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च-

(i) गुञ्जनसक्सेना कीदृशी बालिका आसीत्?

...............................................................................................

(ii) गुञ्जनसक्सेना कस्य महाविद्यालयस्य छात्रा आसीत्?

...............................................................................................

(iii) गुञ्जनसक्सेना कुत्र विमानम् अचालयत्?

...............................................................................................

(iv) गुञ्जनसक्सेना कान् अरक्षत्?

...............................................................................................

(v) वयं वीरबालिकां कदा स्मरिष्यामः?

...............................................................................................

6. स्थूलपदानां स्थानेषु कोष्ठकात् उचितं पदं चित्वा प्रश्नवाक्यानि रचयित्वा वदन्तु लिखन्तु च-

(i) भारतमाता वीराणां **जननी** अस्ति। (का, कः, के)

...............................................................................................

(ii) अनेके वीरबालकाः **भारतभूमौ** उत्पन्नाः अभवन्। (कदा, कुत्र, कस्य)

...............................................................................................



Scanned by CamScanner

(iii) सा प्रथमा भारतीया **विमानचालिका** आसीत्।　　(का, किम्, कः)

-----------------------------------------------------------------

(iv) सा **सैनिकेभ्यः** आवश्यकवस्तूनां वितरणम् अकरोत्।　　(कैः, कान्, केभ्यः)

-----------------------------------------------------------------

(v) गुञ्जनसक्सेना युद्धक्षेत्रे **विमानम्** अचालयत्।　　(का, कः, किम्)

-----------------------------------------------------------------

## मूल्यात्मकः प्रश्नः

**भवन्तः अपठन् यत् गुञ्जनसक्सेना राष्ट्रसेवायै भारतीय-वायुसेनाम् प्राविशत्। भवान्/भवती देशसेवायै किं कर्तुम् इच्छति? इति विचार्य कक्षायां वदतु।**

## गतिविधिः

**गुञ्जनसक्सेनायाः विषये अन्यां सूचनाम् अन्विष्य सङ्कलनं कुर्वन्तु कक्षायां च श्रावयन्तु।**



Scanned by CamScanner

## व्याकरणम्

### लङ् लकारः (भूतकालः)

**[Past Tense]**

■ **अधोलिखितानि वाक्यानि पठन्तु क्रियापदानि च रेखाङ्कितानि कुर्वन्तु–**

एकस्मिन् आश्रमे एकः मुनिः अवसत्। सः योगसिद्धः आसीत्। एकदा एकः मूषकः तस्य क्रोडम् प्राविशत्। सः अपश्यत् यत् एकः विडालः तं खादितुम् आगच्छत्। सः मूषकम् अवदत् त्वम् अपि विडालः भव।





- अत्र क्रिया भूतकाले सम्पन्ना अस्ति।
- भूतकाले 'लङ्' लकारस्य प्रयोगः भवति।

■ **अधोलिखितानि क्रियापदानि पठन्तु अवगच्छन्तु च–**

| | वर्तमानकालः (लट्लकारः) | भूतकालः (लङ्लकारः) | वर्तमानकालः (लट्लकारः) | भूतकालः (लङ्लकारः) |
|---|---|---|---|---|
| यथा– | अस्ति | आसीत् | गच्छति | अगच्छत् |
| | पठति | अपठत् | खादति | अखादत् |
| | वदति | अवदत् | भवति | अभवत् |
| | यच्छति | अयच्छत् | वसति | अवसत् |
| | चलति | अचलत् | पश्यति | अपश्यत् |
| | पतति | अपतत् | पृच्छति | अपृच्छत् |
| | कथयति | अकथयत् | करोति | अकरोत् |
| | तिष्ठति | अतिष्ठत् | लिखति | अलिखत् |
| | हरति | अहरत् | रक्षति | अरक्षत् |
| | धावति | अधावत् | भ्रमति | अभ्रमत् |
| | नमति | अनमत् | हसति | अहसत् |



Scanned by CamScanner

■ 'पठ्' धातोः रूपाणि लङ्लकारे पश्यन्तु–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अपठत् | अपठताम् | अपठन् |
| मध्यमः | अपठः | अपठतम् | अपठत |
| उत्तमः | अपठम् | अपठाव | अपठाम |

## अभ्यासः

1. 'पठ्' धातोः रूपाणि दृष्ट्वा तालिकायाम् 'लिख्' धातोः रूपाणि लङ्लकारे लिखन्तु–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | ------------------- | ------------------- | ------------------- |
| मध्यमः | ------------------- | ------------------- | ------------------- |
| उत्तमः | ------------------- | ------------------- | ------------------- |

2. अधोलिखितधातुभिः सह लङ्लकारस्य प्रत्ययान् संयोज्य क्रियारूपाणि रचयन्तु–

यथा– अ + भ्रम् + अत् ---------- अभ्रमत् ----------

अ + चल् + आव ------------------------------

अ + वस् + अतम् ------------------------------

अ + नम् + अन् ------------------------------

अ + पठ् + आम ------------------------------

अ + लिख् + अम् ------------------------------

अ + खाद् + अताम् ------------------------------

अ + धाव् + अः ------------------------------

अ + रक्ष् + अम् ------------------------------

अ + गच्छ् + अत् ------------------------------





Scanned by CamScanner

3. **लङ्लकारस्य धातुरूपैः कथाम् पूरयन्तु–**

एकः काकः पिपासितः आसीत्। सः व्याकुलः ---------------------- (भू)। सः जलाय सर्वत्र ---------------------- (भ्रम्)। सः एकम् घटम् ---------------------- (दृश्)। घटे स्वल्पम् जलम् ---------------------- (अस्)। सः एकम् उपायम् ---------------------- (चिन्त्)। सः पाषाणखण्डानि ---------------------- (आ + नी)। घटे च ---------------------- (क्षिप्)। शनैः शनैः जलम् उपरि ---------------------- (आ + गम्)। सः जलम् ---------------------- (पा)।

4. **कथाम् भूतकाले परिवर्तयन्तु–**

एकः कुक्कुरः नदीतटे गच्छति। कुक्कुरस्य मुखे रोटिका अस्ति। सः जले प्रतिबिम्बं पश्यति। सः चिन्तयति–एषः अन्यः कुक्कुरः अस्ति। एतस्य मुखे अपि रोटिका अस्ति। अहम् एतस्य रोटिकाम् खादामि।

यदा सः रोटिकाम् खादितुं प्रयत्नं करोति। तदा तस्य मुखात् रोटिका जले पतति। सः लुब्धः कुक्कुरः निराशः भवति पश्चात्तापम् च करोति।



--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------



Scanned by CamScanner

## लङ् लकारः

■ 'भ्रम्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अभ्रमत् | अभ्रमताम् | अभ्रमन् |
| मध्यमः | अभ्रमः | अभ्रमतम् | अभ्रमत |
| उत्तमः | अभ्रमम् | अभ्रमाव | अभ्रमाम |

■ 'स्था' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यमः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तमः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

■ 'पा' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमः | अपिबः | अपिबतम् | अपिबत |
| उत्तमः | अपिबम् | अपिबाव | अपिबाम |

■ 'नृत्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अनृत्यत् | अनृत्यताम् | अनृत्यन् |
| मध्यमः | अनृत्यः | अनृत्यतम् | अनृत्यत |
| उत्तमः | अनृत्यम् | अनृत्याव | अनृत्याम |



Scanned by CamScanner

■ 'गम्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमः | अगच्छम् | अगच्छाव | अगच्छाम |

■ 'दृश्' धातोः रूपाणि–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमः | अपश्यम् | अपश्याव | अपश्याम |

## स्त्रीलिङ्गम्
## [Feminine Gender]

■ एतानि वाक्यानि पठन्तु अवगच्छन्तु च–



← (i) एषा चटका कूजति।

(ii) सा बाला नृत्यति। →





← (iii) एते चटके कूजतः।

(iv) ते बाले नृत्यतः। →





Scanned by CamScanner



← (v) एताः महिलाः गच्छन्ति।

(vi) ताः छात्राः पठन्ति। →



## अभ्यासः

**1. उदाहरणं दृष्ट्वा उचितैः पदैः रिक्तस्थानपूर्तिं कुर्वन्तु–**

(i) -----एषा------- का अस्ति? (एतत्)

(ii) एषा ---------------- अस्ति।





(iii) -------------- के स्तः? (तत्)

(iv) ते -------------- स्तः।

(v) एताः -------------- पठन्ति? (किम्)

(vi) एताः -------------- पठन्ति।



**2. उचितं रूपं चित्वा रिक्तस्थानानि पूरयन्तु–**

(i) -----महिलाः-------------- भ्रमन्ति। (महिला, महिले, महिलाः)

(ii) -------------------------- नृत्यतः। (बालिका, बालिके, बालिकाः)

(iii) -------------------------- कूजन्ति। (चटकाः, चटके, चटका)

(iv) -------------------------- नमति। (लता, लते, लता)

(v) -------------------------- पठतः। (छात्रा, छात्रे, छात्राः)

(vi) -------------------------- क्रीडति। (बाला, बाले, बालाः)

* * * * * *



Scanned by CamScanner

सप्तमः पाठः

# प्रहेलिकाः

1. 'न' तस्य **आदिः** 'न' तस्य अन्तः
मध्ये 'य' तस्य तिष्ठति
तव अपि अस्ति मम अपि अस्ति,
यदि जानासि तद् वद।।



2. **अपदो** दूरगामी च, साक्षरः न च **पण्डितः**।
**अमुखः स्फुटवक्ता** च, यः जानाति सः पण्डितः।।





3. **धरायाः** उपरि, अधः अपि वसति।
**धूमः** भूत्वा गगने इतस्ततः भ्रमति।।



4. भोजनम् न खादति पिबति न जलम्।
निरन्तरम् चलति **बोधयति** च समयम्।।



5. **वृक्षाग्रवासी** न च पक्षिराजः,
त्रिनेत्रधारी न च शूलपाणिः।
**त्वग्वस्त्रधारी** न च सिद्धयोगी,
जलं च **बिभ्रत्** न घटः न मेघः।।



Scanned by CamScanner

## शब्दार्थ : Word-Meaning

| | | |
|---|---|---|
| आदिः | आरम्भ | foremost/begining |
| अपदः (अपदो) | बिना पैर के | without feet |
| पण्डितः | बुद्धिमान/विद्वान | wise man |
| अमुखः | बिना मुख के | without a mouth |
| स्फुटवक्ता | स्पष्ट बोलने वाला | one who is blunt in speech/ speaks with clarity |
| धरायाः | पृथ्वी के | earth's |
| धूमः | धुआँ | smoke |
| बोधयति | बताता है/बताती है | tells/informs |
| वृक्षाग्रवासी | पेड़ की चोटी पर रहने वाला | one who lives on the top of the tree |
| त्वग्वस्त्रधारी | चमड़ी रूपी वस्त्र पहनने वाला | in the garb of the skin |
| विभ्रत् | धारण करता हुआ | bearing |



Scanned by CamScanner

## अभ्यासः

1. **प्रश्नान् पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**

(i) किम् वयम् नयनं विना द्रष्टुं शक्नुमः? --------------------

(ii) किं जलं धूमः भूत्वा गगनं गच्छति? --------------------

(iii) किं पत्रम् मुखेन विना वदति? --------------------

(iv) किं शिवः त्रिनेत्रधारी अस्ति? --------------------

(v) किं घटिका जलं पिबति? --------------------

(vi) किं नारिकेलफले जलं भवति? --------------------



2. **मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–**

(i) पत्रं मुखेन विना --------------------।

(ii) जलं धरायाः उपरि अस्ति -------------------- अपि अस्ति।

(iii) घटिका भोजनं न --------------------, जलम् न --------------------

तथापि निरन्तरं --------------------।

(iv) न तस्य आदिः न तस्य --------------------।

(v) तस्य त्रीणि नेत्राणि -------------------- तथापि -------------------- न अस्ति।

सन्ति, खादति, अन्तः, वदति, शिवः, चलति, अधः, पिबति

3. **विपरीतार्थकान् शब्दान् चित्वा लिखन्तु–**

(i) इतः --------------------

(ii) उपरि --------------------

(iii) आम् --------------------

(iv) आदिः --------------------

(v) मम --------------------

(vi) निरन्तरम् --------------------

न, अन्तः, ततः, अधः, यदा-कदा, तव



Scanned by CamScanner

4. **एतेषाम् प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**

(i) वयम् केन पश्यामः? ----------------------------

(ii) पत्रवाहकः किम् वितरति? ----------------------------

(iii) का भोजनं न खादति? ----------------------------

(iv) मेघः केन निर्मितः? ----------------------------

(v) का समयम् बोधयति? ----------------------------



5. **कोष्ठकात् उचितं पदं चित्वा एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) चरणाभ्याम् विना किं चलति? (खगः, पत्रम्, गजः)

--------------------------------------------------------------------------------

(ii) कस्य आदिः अन्तः च 'न' भवति? ('नयन' शब्दस्य, 'पठन' शब्दस्य, 'खनन' शब्दस्य)

--------------------------------------------------------------------------------

(iii) धूमः भूत्वा कः गगने भ्रमति? (कपोतः, मेघः, जलम्)

--------------------------------------------------------------------------------

(v) कस्मिन् जलं भवति? (नारिकेलफले, कदलीफले, आम्रफले)

--------------------------------------------------------------------------------

(v) मुखेन विना कः वदति? (पत्रम्, मानवः, बालः)

--------------------------------------------------------------------------------

6. **स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) पत्रम् **मुखेन** विना वदति।

--------------------------------------------------------------------------------

(ii) धूमः **गगनं** गच्छति।

--------------------------------------------------------------------------------

(iii) **घटिका** निरन्तरं चलति।

--------------------------------------------------------------------------------

(iv) **गरुडः** वृक्षाग्रवासी अस्ति।

--------------------------------------------------------------------------------

(v) नारिकेलफलं **जलेन** पूरितं भवति।

--------------------------------------------------------------------------------



Scanned by CamScanner

7. **उचितं मेलनं कृत्वा लिखन्तु-**

| | | |
|---|---|---|
| यथा- न तस्य आदिः | न तस्य अन्तः। | मम अपि अस्ति। |
| (i) अपदः | ............................ | अधः अपि वसति। |
| (ii) अमुखः | ............................ | न च पण्डितः। |
| (iii) तव अपि अस्ति | ............................ | न तस्य अन्तः। |
| (iv) साक्षरः | ............................ | स्फुटवक्ता च। |
| (v) धरायाः उपरि | ............................ | दूरगामी च। |

## मूल्यात्मकः प्रश्नः

युष्माभिः प्रहेलिकायां घटिकायाः विषये पठितम्। घटिका समयं बोधयितुं निरन्तरं चलति। सा समयस्य पालने सदुपयोगे च जनानां सहायतां करोति। अधुना विचारयन्तु पुस्तिकायां च लिखन्तु यत् निरन्तरं चलनेन घटिका अस्मभ्यं कम् सन्देशं यच्छति।

## गतिविधिः

काम् अपि अन्यां प्रहेलिकाम् अन्विष्य कक्षा-पुस्तिकायां लिखन्तु ताम् कक्षायां श्रावयन्तु च।



Scanned by CamScanner

# व्याकरणम्

## उपसर्गाः
**[Prefixes]**

| 'क' स्तम्भः | — | 'ख' स्तम्भः |
|---|---|---|
| (i) बालकः गच्छति। | — | बालकः आगच्छति। |
| (ii) वृक्षात् पत्रं पतति। | — | खगः गगने उत्पतति। |
| (iii) पुत्रः कार्यं करोति। | — | पुत्रः जनकम् अनुकरोति। |
| (iv) चौरः धनं हरति। | — | नृपः वाटिकायां विहरति। |
| (v) पुत्रः जनकं नमति। | — | पुत्रः अम्बां प्रणमति। |

- उपरि 'ख' स्तम्भे लिखितेषु वाक्येषु क्रियापदानाम् अर्थः 'क' स्तम्भात् भिन्नः अस्ति।
- कारणं 'ख' स्तम्भस्य क्रिया-पदानि 'आ', 'उत्', 'अनु' 'वि' 'प्र' उपसर्गैः युक्तानि सन्ति।

**ध्यातव्यम्–**
उपसर्गस्य प्रयोगः धातोः शब्दात् वा पूर्वं भवति। उपसर्गयुक्त-पदानां कुत्रचित् अर्थः भिन्नः कुत्रचित् समानः भवति।

## अभ्यासः

1. **कोष्ठके लिखितानि पदानि योजयित्वा रिक्तस्थानानि पूरयन्त–**

(i) शिष्यः गुरुं ---------------------------------------- । (प्र + नमति)

(ii) विमानम् आकाशे ---------------------------------------- । (उत् + पतति)

(iii) सः क्रीडाक्षेत्रात् ---------------------------------------- । (आ + गच्छति)

(iv) माता दुग्धम् ---------------------------------------- । (आ + नयति)

(v) जनाः उद्याने ---------------------------------------- । (वि + हरन्ति)

(vi) गङ्गा हिमालयात् ---------------------------------------- । (निर् + गच्छति)



Scanned by CamScanner

# अव्ययपदानि

## [Indeclinable Words]



विडालः पेटिकायाः **उपरि** तिष्ठति।



विडालः पेटिकायाः **नीचैः** अस्ति।



विडालः पेटिकायाः **अन्तः** अस्ति।



विडालः पेटिकायाः **बहिः** निर्गच्छति।



विडालः पेटिकायाः **वामतः** अस्ति।



विडालः पेटिकायाः **दक्षिणतः** तिष्ठति।



विडालः पेटिकायाः **पुरतः** तिष्ठति।

**उपरिलिखितेषु वाक्येषु यानि स्थूलपदानि सन्ति तानि अत्र लिखन्तु–**

---------------------- ---------------------- ---------------------- ----------------------

---------------------- ---------------------- ---------------------- ----------------------

एतानि पदानि **'अव्ययानि'** कथ्यन्ते। एतेषाम् अव्ययपदानां रूपाणि न भवन्ति। एतेषाम् अव्ययानां प्रयोगः त्रिषु लिङ्गेषु सर्वेषु वचनेषु, सर्वासु च विभक्तिषु समानरूपेण एव भवति।



Scanned by CamScanner

## अभ्यासः

1. **इमां कथां पठन्तु–**

पुरा एकः काकः आसीत्। **एकदा** सः पिपासया व्याकुलः अभवत्। सः **इतस्ततः** अभ्रमत्। **कुत्रचित्** सः जलम् **न** अपश्यत्। **तदा** सः अचिन्तयत् **अधुना** किं करोमि। सः **पुनः इतस्ततः** अभ्रमत्। **सहसा एव** सः एकम् घटम् अपश्यत्। घटे **किञ्चित् एव** जलम् आसीत्। **ततः** सः चिन्तयति-**कथम्** एतत् जलम् **उपरि** आगमिष्यति। सः **पुनः** विचारयति। **एवम्** विचारयन् सः **पुरः पुरः** गच्छति। सः **तत्र** कङ्कणानि अपश्यत्। सः **एकैकं** कङ्कणं घटे अक्षिपत्। **यदा** सः बहूनि कङ्कणानि घटे अक्षिपत् **तदा** घटस्य जलम् **उपरि** आगच्छत्। **एवम्** सः जलम् अपिबत् सन्तुष्टः **च** अभवत्।





**अस्यां कथायां यानि स्थूलपदानि सन्ति तानि अव्ययपदानि सन्ति। एतानि चित्वा अधः लिखन्तु–**

| | | | | |
|---|---|---|---|---|
| ---------------- | ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- | ---------------- |
| ---------------- | ---------------- | ---------------- | ---------------- | ---------------- |

2. **मञ्जूषायाः अव्ययानि चित्वा रिक्त-स्थानानि पूरयन्तु–**

**मञ्जूषा** सह, प्रति, पुरःपुरः, अधुना, नीचैः, उच्चैः, उपरि, शनैः, इतस्ततः, बहिः





(i) वृक्षस्य ---------------- वानरः अस्ति।

(ii) सः ---------------- गच्छति।



Scanned by CamScanner



(iii) काकः ------------------ वदति।



(iv) कच्छपः ------------------ गच्छति।



(v) कुक्करः ------------------ भ्रमति।



(vi) पुरुषः ------------------ गच्छति।



(vii) अहम् ------------------ पठामि।



(viii) सा उपवनम् ------------------ गच्छति।



(ix) जलम् ------------------ पतति।



(x) बालकः मात्रा ------------------ गच्छति।



Scanned by CamScanner

3. **अव्ययपदानि रेखाङ्कितानि कुर्वन्तु–**



रमा – त्वम् कुत्र गच्छसि?

कर्णः – अहम् तु उद्यानं प्रति गच्छामि।

रमा – अहम् अपि त्वया सह गमिष्यामि।

कर्णः – बाढम्। (उभौ गच्छतः)

कर्णः – एषः कः अस्ति?

रमा – एषः तु मालाकारः। सः सदैव वृक्षाणां रक्षणे तत्परः भवति।

कर्णः – उचितम्। यदि मालाकारः न भवेत् तर्हि उद्यानस्य शोभा अपि न भविष्यति।

रमा – एतत् तु सत्यम्।



कर्णः – सः सदैव पादपान् सन्ततिः इव पालयति।

रमा – पश्य। सः अत्र एव आगच्छति।

कर्णः – आगच्छ। तं पादपानां विषये किञ्चित् पृच्छावः।

रमा – आह। सः तु बहिः एव गच्छति।

कर्णः – परम् आवाम् शीघ्रम् चलित्वा तम् अनुसरावः।

रमा – पश्य। सः अपि शीघ्रं चलति।

कर्णः – आह। श्वः पुनः आगमिष्यावः। एवं च तम् पादपानां विषये प्रक्ष्यावः।

4. **मञ्जूषायां दत्तान् शब्दान् संयोज्य वाक्यानि रचयन्तु–**

| | | | |
|---|---|---|---|
| | अद्य | गृहे | पठामि |
| | अधुना | सत्यम् | गच्छामि |
| | तत्र | विद्यालयम् | तिष्ठामि |
| अहम् | अपि | उपवने | वदामि |
| | अत्र | पुस्तकम् | भ्रमामि |
| | शीघ्रं | कार्यम् | करोमि |
| | सदा | पाठम् | स्मरामि |

(i) ------------------------------------------------------------

(ii) ------------------------------------------------------------

(iii) ------------------------------------------------------------



Scanned by CamScanner

(iv) ----------------------------------------------------------------------------------------

(v) ----------------------------------------------------------------------------------------

(vi) ----------------------------------------------------------------------------------------

(vii) ----------------------------------------------------------------------------------------



5. **अव्ययं चित्वा रिक्तस्थानानि पूरयन्तु–**

इत्थम्, एकदा, परस्परम्, अतीव, सर्वदा, तत्र

-------------------- द्वे मित्रे आस्ताम्। तौ -------------------- घनिष्ठौ आस्ताम्। तयोः मध्ये -------------------- स्नेहः आसीत्। तौ -------------------- मिलित्वा एव भ्रमणाय गच्छतः। -------------------- तौ दीर्घं वार्तालापं कुरुतः। -------------------- तौ कालं सुखेन यापयतः।

6. **पठन्तु अवगच्छन्तु च–**

| | | |
|---|---|---|
| एकदा | एक बार | once |
| पुरा | बहुत समय पहले | once upon a time |
| इतस्ततः | इधर-उधर | here and there |
| तदा | तब | then |
| अधुना | अब | now |
| यदा | जब | when |
| च | और | and |
| पुनः पुनः | बार-बार | again and again |
| बहिः | बाहर | outside |
| सह | साथ | with |
| अपि | भी | also |
| अतीव | बहुत अधिक | excessive |
| एव | ही | only |
| तत्र | वहाँ | there |
| न | नहीं | no |

❊❊❊❊❊❊



Scanned by CamScanner




# धन्या मातुः महिमा



एकः बालकः **आसीत्**। तस्य नाम आलः आसीत्। एकदा सः **मातरम्** अपृच्छत्— 'मातः! मूर्खः कः भवति?' माता अवदत्— 'यः बुद्धिहीनः भवति, सः मूर्खः।' सः बालकः दुःखी अभवत् **अकथयत्** च— 'तदा अहं बुद्धिहीनः अस्मि। विद्यालये सर्वे माम् मूर्खः' इति कथयन्ति। अधुना अहं विद्यालयं न **गमिष्यामि**।' माता अवदत्— 'पुत्र! **निराशः** मा भव। अहं त्वां पाठयिष्यामि। त्वं मूर्खः न **असि**।'

माता बालकं प्रतिदिनम् **अपाठयत्**। सः बालकः अपि परिश्रमेण अपठत् मातुः सेवां च अकरोत्। एकस्मिन् दिवसे सः महान् **वैज्ञानिकः** अभवत्। '**तस्य** नाम थामस अल्वा एडीसन' आसीत्। **विद्युद्-दीपकः** ग्रामोफ़ोन-यन्त्रम्, **चलचित्रयन्त्रम्** आदीनि **वस्तूनि** अस्य एव महावैज्ञानिकस्य **आविष्काराः** सन्ति। एषः महान् वैज्ञानिकः अकथयत्— 'मम माता एव मम **मार्गदर्शिका** शिक्षिका च अस्ति।'



सत्यम् एव अस्ति—माता एव अस्माकं परमो गुरुः मार्गदर्शिका च भवति। धन्या **मातुः महिमा**। कथ्यते अपि—माता स्वर्गात् उच्चतरा भवति।





Scanned by CamScanner

## शब्दार्थाः : Word-Meaning

| | | |
|---|---|---|
| आसीत् | था | was |
| मातरम् | माता को/से | mother |
| अकथयत् | (उसने) कहा | (he) said |
| गमिष्यामि | (मैं) जाऊँगा | (I) will go |
| निराशः | आशा के बिना, (निराश) | hopeless |
| असि | (तुम) हो | (you) are |
| अपाठयत् | पढ़ाया | taught |
| वैज्ञानिकः | वैज्ञानिक | scientist |
| तस्य | उसका | his |
| विद्युद्-दीपकः | बिजली का बल्ब | bulb |
| चलचित्रयन्त्रम् | फिल्म का यन्त्र | film projector |
| वस्तूनि | वस्तुएँ | things |
| आविष्काराः | खोजें | discoveries |
| मार्गदर्शिका | रास्ता दिखाने वाली | path director/guide |
| मातुः | माता की | mother's |
| महिमा | बड़प्पन | greatness |



Scanned by CamScanner

## अभ्यासः

1. एतानि वाक्यानि 'शुद्धानि' 'अशुद्धानि' वा इति लिखन्तु–
   (i) बालकः आलः महान् वैज्ञानिकः अभवत्। ------------------------------
   (ii) आलः मूर्खः न आसीत्। ------------------------------
   (iii) आलः परिश्रमी आसीत्। ------------------------------
   (iv) बालकस्य माता तं 'मूर्खः' इति अकथयत्। ------------------------------
   (v) बालकस्य माता तं प्रतिदिनम् अपाठयत्। ------------------------------

2. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयन्त–
   (i) एकः ------------------ आसीत्।
   (ii) तस्य ------------------ आलः आसीत्।
   (iii) सः ------------------ न आसीत्।
   (iv) तस्य ------------------ तम् अपाठयत्।
   (v) धन्या मातुः ------------------।

| माता |
|---|
| नाम |
| महिमा |
| बालकः |
| मूर्खः |

3. विपरीतार्थक-शब्दान् चित्वा लिखन्तु–
   (i) मूर्खः ----------------------------
   (ii) दुःखी ----------------------------
   (iii) सत्यम् ----------------------------
   (iv) दिवसे ----------------------------
   (v) बुद्धिहीनः ----------------------------

| रात्रौ |
|---|
| बुद्धिमान् |
| सुखी |
| असत्यम् |
| विद्वान् |

4. एतेषां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु–
   (i) बालकस्य नाम किम् आसीत्? ------------------------------
   (ii) मूर्खः कः भवति? ------------------------------
   (iii) बालकं का प्रतिदिनम् अपाठयत्? ------------------------------
   (iv) किं बालकः महान् वैज्ञानिकः अभवत्? ------------------------------
   (v) महावैज्ञानिकस्य मार्गदर्शिका का आसीत्? ------------------------------



Scanned by CamScanner

5. **एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) बालकः आलः मातरम् किम् अपृच्छत्?

----------------------------------------

(ii) कः कथयति– 'अहं विद्यालयं न गमिष्यामि।'

----------------------------------------

(iii) बालकस्य पूर्णं नाम किम् आसीत्?

----------------------------------------

(iv) किं बालकस्य माता तं प्रतिदिनम् अपाठयत्?

----------------------------------------

(v) बालकः केषां वस्तूनाम् आविष्कारान् अकरोत्?

----------------------------------------

6. **स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) माता **बालकं** प्रतिदिनम् अपाठयत्।

----------------------------------------

(ii) बालकः **मातरम्** अपृच्छत्।

----------------------------------------

(iii) **बालकः** परिश्रमी आसीत्।

----------------------------------------

(iv) माता **अस्माकं** मार्गदर्शिका भवति।

----------------------------------------

(v) माता **स्वर्गात्** उच्चतरा भवति।

----------------------------------------

7. **एतानि वाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) माता तं बालकं प्रतिदिनम् अपाठयत्।

(ii) विद्यालये सर्वे तं 'मूर्खः' इति कथयन्ति स्म।

(iii) सः महान् वैज्ञानिकः अभवत्।

(iv) सः दुखी भूत्वा विद्यालयं गन्तुम् न इच्छति स्म।

(v) बालकः आलः विद्यालये अपठत्।



Scanned by CamScanner

उत्तरम्–

(i) ----------------------------------------------------------------------------------------------------

(ii) ----------------------------------------------------------------------------------------------------।

(iii) ----------------------------------------------------------------------------------------------------।

(iv) ----------------------------------------------------------------------------------------------------।

(v) ----------------------------------------------------------------------------------------------------।

----------------------------------------------------------------------------------------------------।

## मूल्यात्मकः प्रश्नः

युष्माभिः पाठे पठितं यत् बालकः आलः मातुः आज्ञापालनेन तस्याः मार्गदर्शनेन स्वपरिश्रमेण च विश्वप्रसिद्धः अभवत्। अधुना विचारयन्तु यत् भवान्/भवती मात्रा पित्रा च सह कीदृशं व्यवहारं करोति? मातुः पितुः शिक्षकाणां च आज्ञया किं किं करोति?

## गतिविधिः

भारतदेशे अपि अनेके वैज्ञानिकाः अभवन्। कस्यचित् एकस्य वैज्ञानिकस्य चित्रं रचयन्तु। नाम्ना सह तस्य आविष्काराणाम् अपि उल्लेखं कुर्वन्तु–



Scanned by CamScanner

## व्याकरणम्

# शब्दरूपाणि

## [Forms of Words—Nouns]

### इकारान्ताः पुल्लिङ्गे स्त्रीलिङ्गे च

- येषाम् शब्दानाम् अन्ते 'इकारः' भवति ते शब्दाः इकारान्ताः कथ्यन्ते। केचन इकारान्ताः शब्दाः पुल्लिङ्गे भवन्ति केचन च स्त्रीलिङ्गे।
  - मुनि, ऋषि, रवि, हरि, कपि आदयः शब्दाः पुल्लिङ्गे सन्ति।
  - मति, भूमि, प्रकृति, कीर्ति, प्रीति, सूक्ति, सम्पत्ति आदयः शब्दाः स्त्रीलिङ्गे सन्ति।
- इकारान्तानां पुल्लिङ्ग-शब्दानाम् रूपाणि एवं भवन्ति–

**मुनि (इकारान्तः, पुल्लिङ्गे)**

| विभक्तिः | एकवचनम् | द्विवचनम् | वहुवचनम् |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| द्वितीया | मुनिम् | मुनी | मुनीन् |
| तृतीया | मुनिना | मुनिभ्याम् | मुनिभिः |
| चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| पञ्चमी | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| षष्ठी | मुनेः | मुन्योः | मुनीनाम् |
| सप्तमी | मुनौ | मुन्योः | मुनिषु |
| सम्वोधनम् | हे मुने! | हे मुनी! | हे मुनयः! |



Scanned by CamScanner

## अभ्यासः

1. अधोलिखित-शब्दानां रूपाणि लिखित्वा रिक्त-स्थानानि पूरयत–

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | वहुवचनम् |
|---|---|---|---|---|
| ऋषि | प्रथमा | ------------------- | ------------------- | ऋषयः |
| कपि | द्वितीया | ------------------- | कपी | ------------------- |
| गिरि | तृतीया | गिरिणा | ------------------- | ------------------- |
| हरि | चतुर्थी | ------------------- | हरिभ्याम् | ------------------- |
| कवि | पञ्चमी | ------------------- | ------------------- | कविभ्यः |
| अग्नि | षष्ठी | अग्नेः | ------------------- | ------------------- |
| रवि | सप्तमी | ------------------- | रव्योः | ------------------- |
| शिवि | सम्बोधनम् | ------------------- | हे शिवी! | ------------------- |

2. अधोलिखिते कोष्ठके 'ऋषिः' किम् किम् करोति इति लिखितम् अस्ति। अधः विभक्ति- क्रमेण तत् लिखन्तु वदन्तु च–

| | | |
|---|---|---|
| सदा वदति हे शिवे! / मम समीपे वस | मुनेः पाठम् / पठति | हरौ विश्वासं / करोति |
| प्रातः / उत्तिष्ठति | ऋषिः | अग्निम् / पूजयति |
| कपये फलानि / यच्छति | शिविना सह / खेलति | गिरेः समीपे / वसति |

यथा–

(i) ऋषिः प्रातः उत्तिष्ठति। (ii) -------------------------------------------------

(iii) ------------------------------------------------- (iv) -------------------------------------------------

(v) ------------------------------------------------- (vi) -------------------------------------------------

(vii) ------------------------------------------------- (viii) -------------------------------------------------



Scanned by CamScanner

इकारान्तानाम् स्त्रीलिङ्ग-शब्दानाम् रूपाणि एवं भवन्ति–

## मति (इकारान्तः, स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते! | हे मती! | हे मतयः! |

## अभ्यासः

1. उपरि-लिखितानि 'मति' शब्दस्य रूपाणि ध्यानेन पठन्तु वदन्तु च। इकारान्त-स्त्रीलिङ्ग-शब्दानाम् रूपाणि एवम् भवन्ति। एतानि रूपाणि अधिकृत्य अधोलिखित-शब्दानाम् यथानिर्दिष्टम् रूपाणि लिखन्तु वदन्तु च-

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| धृति | प्रथमा | ---------- | ---------- | ---------- |
| उन्नति | द्वितीया | ---------- | ---------- | ---------- |
| कीर्ति | तृतीया | ---------- | ---------- | ---------- |
| जाति | चतुर्थी | ---------- | ---------- | ---------- |
| शक्ति | पञ्चमी | ---------- | ---------- | ---------- |
| प्रगति | षष्ठी | ---------- | ---------- | ---------- |
| उपाधि | सप्तमी | ---------- | ---------- | ---------- |
| प्रीति | सम्बोधनम् | ---------- | ---------- | ---------- |



Scanned by CamScanner

2. अत्र मञ्जूषायां कानिचित् पदानि दत्तानि। विभक्ति-अनुसारं तेषां प्रयोगं कृत्वा अधोलिखित-प्रश्नानाम् उत्तराणि लिखन्तु–

**मञ्जूषा** प्रगत्या, उन्नत्याम्, मातृभूमिम्, रुचिः, शान्त्याः, हे कीर्ते, प्रीत्यै

(i) मेघा – अत्र का वसति?

कीर्तिः – ----------------------------------------

(ii) मेघा – सा काम् नमति?

कीर्तिः – ----------------------------------------

(iii) मेघा – सा कया सह तिष्ठति?

कीर्तिः – ----------------------------------------

(iv) मेघा – सा कस्यै पुस्तकम् आनयति?

कीर्तिः – ----------------------------------------

(v) मेघा – सा कस्याः मित्रम् अस्ति?

कीर्तिः – ----------------------------------------

(vi) मेघा – सा कस्याम् विश्वासं करोति?

कीर्तिः – ----------------------------------------

(vii) मेघा – सा त्वाम् किं वदति?

कीर्तिः – सा वदति ------------------------- त्वम् मम मित्रम् असि।









Scanned by CamScanner

## उकारान्ताः (पुल्लिङ्गे)

- **येषाम् शब्दानाम् अन्ते 'उकारः' भवति ते शब्दाः उकारान्ताः कथ्यन्ते।**
  **यथा–** साधु, गुरु, भानु, रिपु, शिशु। एते शब्दाः पुल्लिङ्गे सन्ति।
- **उकारान्तानां पुल्लिङ्ग-शब्दानाम् रूपाणि एवं भवन्ति–**

### 'साधु' शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | साधुः | साधू | साधवः |
| द्वितीया | साधुम् | साधू | साधून् |
| तृतीया | साधुना | साधुभ्याम् | साधुभिः |
| चतुर्थी | साधवे | साधुभ्याम् | साधुभ्यः |
| पञ्चमी | साधोः | साधुभ्याम् | साधुभ्यः |
| षष्ठी | साधोः | साध्वोः | साधूनाम् |
| सप्तमी | साधौ | साध्वोः | साधुषु |
| सम्बोधनम् | हे साधो! | हे साधू! | हे साधवः! |

## अभ्यासः

1. **उपरिलिखितानि 'साधु' शब्दस्य रूपाणि आधृत्य अधोलिखित-शब्दानाम् रूपाणि यथानिर्दिष्ट-स्थाने लिखन्**

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गुरु | प्रथमा | गुरुः | ---------- | ---------- |
| भानु | द्वितीया | ---------- | ---------- | भानून् |
| विधु | तृतीया | ---------- | विधुभ्याम् | ---------- |
| रिपु | चतुर्थी | रिपवे | ---------- | ---------- |
| विष्णु | पञ्चमी | ---------- | ---------- | विष्णुभ्यः |
| शिशु | षष्ठी | ---------- | शिश्वोः | ---------- |
| वायु | सप्तमी | वायौ | ---------- | ---------- |
| प्रभु | सम्बोधनम् | ---------- | ---------- | हे प्रभवः! |

* * * * * *



Scanned by CamScanner

# "सिक्किम" प्रदेशस्य सौन्दर्यम्

नवमः पाठः



**अध्यापकः** – प्रियाः छात्राः! किम् **भवन्तः जानन्ति** यत् एतद् चित्रं कस्य **प्रदेशस्य** अस्ति?
(सर्वे छात्राः **विचारयन्ति**)

**अनुजः** – आम्। एषः तु सिक्किमप्रदेशः।

**अध्यापकः** – **शोभनम्**। सिक्किम प्रदेशस्य राजधानी का?

**छात्राः** – अस्य प्रदेशस्य राजधानी 'गंगटोक' इति अस्ति।

**अध्यापकः** – शोभनम्। अद्य वयं **प्रक्षेपकयन्त्रेण** सिक्किमप्रदेशस्य चित्राणि **द्रक्ष्यामः**।
(सर्वे छात्राः प्रसन्नाः भवन्ति **करतलध्वनिं** च कुर्वन्ति)

**अध्यापकः** – छात्राः! एतत् प्रमुखं **शिखरं** केन **नाम्ना** प्रसिद्धम्?

**अमिता** – अहम् वदामि। एतत् ''कञ्चनजङ्गा'' शिखरम् अस्ति।

**अध्यापकः** – सुन्दरम्। कञ्चनजङ्गा न केवलम् एकं शिखरम् अपितु एतत् तु तेषां जनजातीनाम् एकं **प्रमुखं** नृत्यम् अपि अस्ति।



**छात्रः** – अस्य प्रदेशस्य अन्यत् किमपि नृत्यम् अस्ति?

**अध्यापकः** – आम्। अधुना पश्यत एतत् नृत्यम्। ते **कृष्णवर्णस्य** ''टोपं'' इति धारयित्वा नृत्यन्ति।



Scanned by CamScanner



**अध्यापक:** – एतस्मिन् चित्रे किम् पश्यसि?

**अमिता** – अत्र एका नदी अस्ति।



**अध्यापक:** – शोभनम् एतस्याः **नद्याः** नाम किम् अस्ति?

**प्रतीक:** – एषा 'तीस्ता' नदी अस्ति।

**अध्यापक:** – शोभनम्। 'तीस्ता' नदी अस्य प्रदेशस्य जीवनरेखा अस्ति। एषा नदी एतस्य प्रदेशस्य **विभाजनं** करोति। एतस्मात् कारणात् अत्र ''भूत्तिया'' ''लिप्चास'' इति **द्वे** जनजाती स्तः।

**विवेक:** – अस्य प्रदेशस्य जनाः जीवनयापनाय किं कार्यं कुर्वन्ति?

**अध्यापक:** – जनाः जीवनयापनाय कृषिकार्यं कुर्वन्ति। सम्पूर्णे भारते एलायाः सर्वाधिकम् उत्पादनम् अत्र एव भवति।



**अनुभव:** – महोदय! एतेषाम् जनानाम् प्रियम् भोजनं किम् अस्ति?

**अध्यापक:** – भवान् स्वयं वदतु।

**अनुभव:** – एतद् तु 'चोमिन' अस्ति।

**अध्यापक:** – एतद् चोमिन-**सदृशम्** अस्ति परं ते एतत् भोजनं 'चाओ चाओ' इति कथयन्ति। एतत् एव एतेषां प्रियं भोजनम् अस्ति।

आगच्छ, अधुना वयं भोजनं कुर्मः। भोजनं **कृत्वा पुनः** कार्यं करिष्यामः।

## शब्दार्थाः Word-Meaning

| | | |
|---|---|---|
| भवन्तः | आप | you all |
| जानन्ति | (वे) जानते हैं | (they) know |
| प्रदेशस्य | राज्य का | of state |
| विचारयन्ति | (वे) सोचते हैं | (they) think |
| शोभनम् | अच्छा | good |
| प्रक्षेपकयन्त्रेण | 'प्रोजेक्टर' से | with projector |
| द्रक्ष्यामः | (हम) देखेंगे | (we) will see |
| करतलध्वनिं | ताली की आवाज़ | clapping |
| शिखरं | (पहाड़ की) चोटी | (mountain) peak |
| नाम्ना | नाम से | by name |
| प्रमुखं | प्रमुख | main |
| कृष्णवर्णस्य | काले रंग का | of black colour |
| नद्याः | नदी का | of river |
| विभाजनं | बँटवारा | division |
| द्वे | दो | two |
| सदृशम् | समान | like |
| कृत्वा | करके | after doing |
| पुनः | फिर | again |



Scanned by CamScanner

## अभ्यासः

1. वदन्तु लिखन्तु च 'आम्' अथवा 'न'–

   (i) किम् सिक्किमप्रदेशे 'कञ्चनजङ्गा' शिखरम् अस्ति? ------------------------------

   (ii) किम् सिक्किमप्रदेशे 'कञ्चनजङ्गा' केवलम् एकं शिखरम् एव अस्ति? ------------------------------

   (iii) किम् 'गङ्गा' नदी सिक्किमप्रदेशे अस्ति? ------------------------------

   (iv) किम् सिक्किमप्रदेशे जनाः 'चाओ चाओ' खादन्ति? ------------------------------

   (v) किम् सिक्किमप्रदेशे केवलम् एका जनजातिः अस्ति? ------------------------------

   (vi) किम् सिक्किमप्रदेशे जनाः टोपं धारयित्वा अपि नृत्यन्ति? ------------------------------

2. मञ्जूषायाः उचितपदं चित्वा रिक्तस्थानानि पूरयन्तु–

   | तीस्ता | नाम | भोजनं | नदी | शिखरम् |
   |---|---|---|---|---|

   (i) अस्य प्रदेशस्य ------------------ सिक्किमप्रदेशः अस्ति।

   (ii) कञ्चनजङ्गा एकं प्रमुखं ------------------ अस्ति।

   (iii) सिक्किमप्रदेशे एका प्रमुखा ------------------ अस्ति।

   (iv) नद्याः नाम ------------------ अस्ति।

   (v) सिक्किमप्रदेशस्य प्रमुखं ------------------ 'चाओ चाओ' इति अस्ति।

3. एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–

   (i) सिक्किम-प्रदेशस्य प्रमुखं शिखरं किम् अस्ति? ------------------------------

   (ii) सिक्किम-प्रदेशस्य राजधानी का अस्ति? ------------------------------

   (iii) सिक्किम-प्रदेशस्य प्रमुखा नदी का अस्ति? ------------------------------

   (iv) सिक्किम-प्रदेशे कति जनजातयः सन्ति? ------------------------------

   (v) अस्य प्रदेशस्य जनाः जीवनयापनाय किं कुर्वन्ति? ------------------------------

4. एतेषां प्रश्नानाम् उत्तराणि एकवाक्येन वदन्तु लिखन्तु च–

   (i) छात्राः केन सिक्किमप्रदेशस्य चित्राणि पश्यन्ति?

   ------------------------------------------------------------

   (ii) सिक्किमप्रदेशस्य जनजातीनां प्रमुखं नृत्यं किम् अस्ति?

   ------------------------------------------------------------

   (iii) सिक्किमप्रदेशस्य विभाजनं का करोति?

   ------------------------------------------------------------



Scanned by CamScanner

(iv) सिक्किमप्रदेशस्य द्वे जनजाती के स्तः? तयोः नामनी लिखन्तु।

---

(v) सिक्किमप्रदेशे कस्याः उत्पादनं सर्वाधिकं भवति?

---

5. **अधोलिखितेषु वाक्येषु स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) **छात्राः** प्रसन्नाः भवन्ति।

---

(ii) सिक्किमप्रदेशस्य प्रमुखा नदी **तीस्ता** अस्ति।

---

(iii) प्रसन्नाः छात्राः **करतलध्वनिं** कुर्वन्ति।

---

(iv) तीस्ता नदी **सिक्किमप्रदेशस्य** जीवनरेखा अस्ति।

---

(v) **गंगटोकः** सिक्किमप्रदेशस्य राजधानी अस्ति।

---

## ■ मूल्यात्मकः प्रश्नः

**युष्माभिः पाठे पठितं यत् नदी प्रदेशवासिनां जीवनस्य आधारभूता अस्ति। अधुना विचारयन्तु–**

(i) अद्यत्वे भारते नदीनां स्थितिः कीदृशी अस्ति?

(ii) नदीनां रक्षायै युष्माकं किं कर्तव्यम् अस्ति?

## ■ गतिविधिः

**भवान्/भवती कस्मिन् प्रदेशे निवसति? स्वप्रदेशस्य विषये पुस्तिकायां लिखन्तु।**



Scanned by CamScanner

# व्याकरणम्

## लृट्लकारः (भविष्यत् काल)

**[Future Tense]**

■ **अधोलिखितानि वाक्यानि ध्यानेन पठन्तु अवगच्छन्तु च–**

- ❖ अहम् अल्पाहारे सेवम् **खादामि**, मध्याह्ने ओदनम् **खादिष्यामि**।
- ❖ बालकः अधुना विद्यालयं **गच्छति**, सायंकाले क्रीडनाय **गमिष्यति**।
- ❖ वयम् अद्य न **क्रीडामः**, श्वः **क्रीडिष्यामः**।
- ❖ मम मित्राणि **आगच्छन्ति**, वयम् भ्रमणाय **गमिष्यामः**।
- ❖ साम्प्रतम् त्वम् **धावसि**, एतत्पश्चात् अहम् **धाविष्यामि**।
- ❖ त्वम् समाचारपत्रम् **पठसि**, स्वपाठम् कदा **पठिष्यसि**?

■ **उपरिलिखितेषु वाक्येषु यानि स्थूलक्रियापदानि सन्ति तानि उचितस्तम्भे लिखन्तु–**

| | वर्तमानकालः (क्रिया अधुना भवति) | भविष्यत्कालः (क्रिया भविष्ये भविष्यति) |
|---|---|---|
| यथा– | खादामि | खादिष्यामि |
| | ------------------------------ | ------------------------------ |
| | ------------------------------ | ------------------------------ |
| | ------------------------------ | ------------------------------ |
| | ------------------------------ | ------------------------------ |
| | ------------------------------ | ------------------------------ |

वर्तमानकाले लट्लकारस्य भविष्यत्काले च लृट्लकारस्य प्रयोगः भवति।

■ **निम्नतालिकायाम् 'पठ्' धातोः रूपाणि लृट्लकारे पश्यन्तु–**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमः | पठिष्यामि | पठिष्यावः | पठिष्यामः |



Scanned by CamScanner

■ एवमेव अन्यधातूनाम् भिन्नानि रूपाणि पश्यन्तु–

| धातवः | लट्लकारे रूपाणि | लृट्लकारे रूपाणि |
|---|---|---|
| पा | पिबति | पास्यति |
| दृश् | पश्यति | द्रक्ष्यति |
| कृ | करोति | करिष्यति |
| गम् | गच्छति | गमिष्यति |
| नृत् | नृत्यति | नर्तिष्यति |
| नी | नयति | नेष्यति |
| दा | यच्छति | दास्यति |
| स्था | तिष्ठति | स्थास्यति |
| अस् | अस्ति | भविष्यति |
| लिख् | लिखति | लेखिष्यति |

## अभ्यासः

1. (अ) अधोलिखितानि क्रियापदानि 'लृट्लकारे' लिखन्तु–

| | लट्लकारः | लृट्लकारः | लट्लकारः | लृट्लकारः |
|---|---|---|---|---|
| यथा– | पठति | पठिष्यति | धावसि | ---------------------- |
| | खादामि | ---------------------- | चलन्ति | ---------------------- |
| | क्रीडामः | ---------------------- | भ्रमति | ---------------------- |

(आ) अधोलिखितानि क्रियापदानि 'लट्लकारे' लिखन्तु–

| | | | | |
|---|---|---|---|---|
| यथा– | वदिष्यति | वदति | हसिष्यति | ---------------------- |
| | भ्रमिष्यामि | ---------------------- | स्मरिष्यामि | ---------------------- |
| | धाविष्यसि | ---------------------- | चलिष्यन्ति | ---------------------- |
| | भविष्यति | ---------------------- | क्रीडिष्यन्ति | ---------------------- |
| | पठिष्यसि | ---------------------- | भविष्यामः | ---------------------- |
| | पठिष्यामः | ---------------------- | करिष्यति | ---------------------- |



Scanned by CamScanner

2. अधुना निम्नतालिकायाम् 'गम्' धातोः रूपाणि पूरयन्तु–

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | ---------------------- | गमिष्यतः | ---------------------- |
| मध्यमः | गमिष्यसि | ---------------------- | ---------------------- |
| उत्तमः | ---------------------- | गमिष्यावः | ---------------------- |

3. एतत् सम्भाषणम् पठन्तु–

**गोविन्दः** – श्वः विवेकस्य जन्मदिवसे किम् त्वम् तस्य गृहं **गमिष्यसि**?

**श्यामः** – न अहम् न **गमिष्यामि**।

**गोविन्दः** – किमर्थम्?

**श्यामः** – श्वः आगरानगरात् मम मित्राणि आगमिष्यन्ति वयम् भ्रमणाय **गमिष्यामः**।

**गोविन्दः** – यूयम् किं **करिष्यथ**?

**श्यामः** – वयम् दिल्लीदर्शनम् **करिष्यामः**।

**गोविन्दः** – दिल्लीनगर्याम् किम् किम् **द्रक्ष्यथ**?

**श्यामः** – पूर्वम् वयम् भारतद्वारम् गत्वा अज्ञातसैनिकेभ्यः श्रद्धाञ्जलिं **दास्यामः**।

**गोविन्दः** – तत्पश्चात्?

**श्यामः** – तत्पश्चात् राष्ट्रपतिभवनम्, कमलमन्दिरम्, रक्तदुर्गम्, राष्ट्रीयसंग्रहालयम्, रेलसंग्रहालयम् एतानि प्रमुखस्थानानि **द्रक्ष्यामः**।

**गोविन्दः** – यूयम् भोजनम् कुत्र **करिष्यथ**?

**श्यामः** – भोजनम् तु वयम् गृहात् एव **नेष्यामः**।

**गोविन्दः** – शोभनः तव कार्यक्रमः।

**उपर्युक्तसम्भाषणे स्थूलक्रियापदानां धातुं, पुरुषं, वचनं च अधोलिखितस्तम्भेषु लिखन्तु–**

| | क्रियापदम् | धातुः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा– | गमिष्यसि | गम् | मध्यम | एक |
| | ---------------------- | ---------------------- | ---------------------- | ---------------------- |
| | ---------------------- | ---------------------- | ---------------------- | ---------------------- |
| | ---------------------- | ---------------------- | ---------------------- | ---------------------- |
| | ---------------------- | ---------------------- | ---------------------- | ---------------------- |



Scanned by CamScanner

# नपुंसकलिङ्गम्

## [Neuter Gender]

■ ध्यानेन पठन्तु अवगच्छन्तु च–








(i) तत् पुस्तकम् – ते पुस्तके – तानि पुस्तकानि







(ii) तत् फलम् – ते फले – तानि फलानि







(iii) एतत् कमलम् – एते कमले – एतानि कमलानि

■ पुनः पठन्तु अवगच्छन्तु च–

(i) तत् पुस्तकम् अस्ति। एतत् पुस्तकम् अस्ति

तत् किम् अस्ति? एतत् किम् अस्ति?

(ii) ते पुस्तके स्तः। एते पुस्तके स्तः।

ते के स्तः? एते के स्तः?



Scanned by CamScanner

(iii) तानि पुस्तकानि सन्ति। एतानि पुस्तकानि सन्ति।

तानि कानि सन्ति? एतानि कानि सन्ति?

**ध्यातव्यम्–**

सर्वनामपदानि प्रायः विशेषणरूपेण प्रयुक्तानि भवन्ति। एतेषां लिङ्ग– विभक्ति– वचनानि विशेष्यानुसारं भवन्ति।

## अभ्यासः

**1. उचितसर्वनामपदैः रिक्तस्थानानि पूरयन्तु–**

(i) चित्रम् अस्ति।

--------------------- चित्रम् अस्ति। (तत्)

तत् --------------------- अस्ति? (किम्)



(ii) पत्रे स्तः।

--------------------- पत्रे स्तः। (एतत्)

एते --------------------- स्तः? (किम्)



(iii) पुष्पाणि सन्ति।

--------------------- पुष्पाणि सन्ति। (एतत्)

एतानि --------------------- सन्ति? (किम्)



(iv) गृहम् अस्ति।

--------------------- गृहम् अस्ति। (तत्)

तत् --------------------- अस्ति? (किम्)





Scanned by CamScanner

(v) व्यजनानि सन्ति।

---------------------- व्यजनानि सन्ति। (एतत्)

एतानि ---------------------- सन्ति? (किम्)



(vi) वस्त्रे स्तः।

----------------------वस्त्रे स्तः (तत्)

ते ---------------------- स्तः? (किम्)



4. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु—

(i) वृक्षात् ---------------------- अपतन्। (फलम्/फलानि)

(ii) प्रकोष्ठे ---------------------- चलति। (व्यजनम्/व्यजने)

(iii) ---------------------- विकसतः। (पुष्पे/पुष्पाणि)

(iv) नरस्य द्वे ---------------------- भवतः। (नेत्रम्/नेत्रे)

(v) गृहे ---------------------- अस्ति। (दूरदर्शनम्/दूरदर्शने)

(vi) गृहे ---------------------- सन्ति। (वातायनम्/वातायनानि)

*******



Scanned by CamScanner

# योग्यः शिष्यः

दशमः पाठः

एकस्मिन् आश्रमे एकः **आचार्यः** वसति स्म। तेन सह शिष्याः अपि वसन्ति स्म। सर्वे शिष्याः गुरोः आदरं कुर्वन्ति स्म। ते शिष्याः परिश्रमिणः आज्ञाकारिणः विनयशीलाः च आसन्। एकदा आचार्यः अचिन्तयत् सर्वेषु शिष्येषु कः योग्यः? इति चिन्तयित्वा सः **सर्वान् शिष्यान् आहूय सर्वेभ्यः** एकम् एकम् कपोतम् **अयच्छत्**। सः **तान्** अवदत्– ''स्वं स्वं कपोतं **कुत्रचित् एतादृशे** स्थाने **मुञ्चन्तु यत्र कोऽपि भवतः** न **पश्यतु**।''



सर्वे शिष्याः कपोतान् **गृहीत्वा** आश्रमात् **बहिः** अगच्छन्। **किञ्चित्** कालस्य **पश्चात्** सर्वे शिष्याः कपोतान् **मोचयित्वा** आश्रमम् **आगच्छन्**। **परन्तु** एकः शिष्यः स्वं कपोतं न अमुञ्चत्। गुरुः तम् **अपृच्छत्**– ''वत्स! त्वं कपोतं **किमर्थं** न अमुञ्चः?''

शिष्यः अवदत्– ''गुरुवर! अहं **तादृशं** स्थानं न अपश्यम् यत्र कोऽपि **मां** न पश्यति।''

गुरुः पुनः अवदत्– ''**कस्मिंश्चित् एकान्ते** स्थाने **गत्वा एतं** कपोतं **मुञ्च**।''

शिष्यः अवदत्– ''गुरुवर! एकान्ते अपि अहं **स्वकार्यं** पश्यामि। सूर्यः चन्द्रः **वृक्षाः पादपाः** इत्यादयः अपि सर्वे मां पश्यन्ति। कुत्रापि एकान्तं स्थानं न अस्ति।''

एतत् **श्रुत्वा** गुरुः **अतीव** प्रसन्नः अभवत्। सः तं शिष्यम् अकथयत्– भवान् एव मम योग्यः शिष्यः अस्ति।



Scanned by CamScanner

## शब्दार्थाः : Word-Meaning

| | | |
|---|---|---|
| आचार्यः | गुरु | great teacher |
| सर्वान् शिष्यान् | सभी शिष्यों को | to all pupils |
| आहूय | बुलाकर | after calling |
| सर्वेभ्यः | सभी को | to all |
| अयच्छत् | (उसने) दिया | (he/she) gave |
| तान् | उन्हें | to them |
| कुत्रचित् | कहीं | some where |
| एतादृशे | इस तरह के | like this |
| मुञ्चन्तु | छोड़ें | leave |
| यत्र | जहाँ | where |
| कोऽपि | कोई | no one/any one |
| भवतः | आपको | to you all |
| पश्यतु | देखे | should see |
| गृहीत्वा | लेकर | after taking |
| वहिः | बाहर | out |
| किञ्चित् | कुछ | some what |
| पश्चात् | बाद में | after |
| मोचयित्वा | छोड़कर | after leaving |
| आगच्छन् | (वे) आए | (they) came |



Scanned by CamScanner

| | | |
|---|---|---|
| परन्तु | लेकिन | but |
| अपृच्छत् | (उसने) पूछा | (he/she) asked |
| किमर्थं | क्यों | why |
| तादृशं | वैसा | like that |
| मां | मुझे | me |
| कस्मिंश्चित् | किसी में | in some |
| एकान्ते | अकेले में | lonely |
| गत्वा | जाकर | having gone |
| एतं | इसे | it |
| मुञ्च | (तुम) छोड़ो | (you) leave |
| स्वकार्यं | अपने काम को | one's work |
| वृक्षाः | पेड़ | trees |
| पादपाः | पौधे | plants |
| श्रुत्वा | सुनकर | after listening |
| अतीव | बहुत | very (too much) |



Scanned by CamScanner

# अभ्यासः

1. **प्रश्नान् पठित्वा वदन्तु लिखन्तु च 'आम्' अथवा 'न'–**
   (i) किम् आचार्यः आश्रमे वसति स्म? ------------------------------
   (ii) किम् आचार्यः शिष्येभ्यः काकम् अयच्छत्? ------------------------------
   (iii) किं सर्वे शिष्याः स्वं स्वं कपोतम् अमुञ्चन्? ------------------------------
   (iv) किं शिष्याः आश्रमात् बहिः अगच्छन्? ------------------------------
   (v) किं सूर्यः चन्द्रः वृक्षाः पादपाः इत्यादयः सर्वे अस्मान् पश्यन्ति? ------------------------------

2. **मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–**

| |
|---|
| कपोतान् |
| एकान्तं |
| अमुञ्चन् |
| शिष्येभ्यः |
| कपोतं |
| अकथयत् |

   (i) एकदा आचार्यः सर्वेभ्यः ------------------ एकम् एकं कपोतम् अयच्छत्।
   (ii) आचार्यः तान् ------------------ यत् स्वं स्वं कपोतम् एकान्ते स्थाने मुञ्चन्तु।
   (iii) सर्वे शिष्याः ------------------ गृहीत्वा आश्रमात् बहिः अगच्छन्।
   (iv) ते सर्वे कपोतान् ------------------ ।
   (v) एकः शिष्यः स्वं ------------------ न अमुञ्चत्।
   (vi) सः कुत्रापि ------------------ स्थानं न अपश्यत्।

3. **विपरीतार्थकं पदं चित्वा लिखन्तु–**

| |
|---|
| आगत्य |
| अन्तः |
| पूर्वम् |
| अयोग्याः |
| एतादृशम् |
| मोचयित्वा |

   (i) योग्याः ----------------------------
   (ii) तादृशम् ----------------------------
   (iii) गृहीत्वा ----------------------------
   (iv) बहिः ----------------------------
   (v) पश्चात् ----------------------------
   (vi) गत्वा ----------------------------------------

4. **एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–**
   (i) आचार्यः कान् आहूतवान्? ------------------------------------
   (ii) आचार्यः शिष्येभ्यः किम् अयच्छत्? ------------------------------------
   (iii) सर्वे शिष्याः कपोतान् गृहीत्वा कुत्र अगच्छन्? ------------------------------------
   (iv) एकः शिष्यः कं न अमुञ्चत्? ------------------------------------
   (v) कः अतीव प्रसन्नः अभवत्? ------------------------------------



Scanned by CamScanner

5. **एतेषाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु–**

(i) आचार्यः कान् अकथयत्?

-----------------------------------------------------------------

(ii) आचार्यः किम् अकथयत्?

-----------------------------------------------------------------

(iii) कः स्वकपोतं न अमुञ्चत्?

-----------------------------------------------------------------

(iv) अस्माकं कार्याणि के पश्यन्ति?

-----------------------------------------------------------------

(v) शिष्याः कपोतान् मोचयित्वा कुत्र आगच्छन्?

-----------------------------------------------------------------

6. **स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु–**

(i) **आचार्यः** स्वशिष्यान् परीक्षते स्म।

-----------------------------------------------------------------

(ii) आचार्यः **शिष्येभ्यः** कपोतम् अयच्छत्।

-----------------------------------------------------------------

(iii) **शिष्याः** कपोतम् गृहीत्वा अगच्छन्।

-----------------------------------------------------------------

(iv) शिष्याः **कपोतान्** अमुञ्चन्।

-----------------------------------------------------------------

(v) **गुरुः** अतीव प्रसन्नः अभवत्।

-----------------------------------------------------------------

(vi) गुरुः **शिष्येषु** स्निह्यति।

-----------------------------------------------------------------

7. **अधोलिखितानि वाक्यानि कथाक्रमानुसारेण लिखन्तु–**

(i) एकदा आचार्यः शिष्येभ्यः कपोतान् दत्वा एकान्ते स्थाने मोचयितुम् अकथयत्।

(ii) एकः शिष्यः स्वं कपोतं न अमुञ्चत्।

(iii) एकः आचार्यः आश्रमे वसति स्म।



Scanned by CamScanner

(iv) सः अकथयत् अहं कुत्रापि एकान्तं स्थानं न अपश्यम्।
(v) तेन सह शिष्याः अपि वसन्ति स्म।
(vi) सर्वे शिष्याः कपोतान् अमुञ्चन्।

उत्तरम्–

(i) ------------------------------------------------------------------------------------।
(ii) ------------------------------------------------------------------------------------।
(iii) ------------------------------------------------------------------------------------।
(iv) ------------------------------------------------------------------------------------।
(v) ------------------------------------------------------------------------------------।
(vi) ------------------------------------------------------------------------------------।

## मूल्यात्मकः प्रश्नः

**'भवत्सु शिष्यस्य के के गुणाः सन्ति' इति प्रश्नान् पठित्वा एकपदेन लिखन्तु–**

(i) भवान्/भवती परिश्रमी अस्ति अथवा अलसः? ------------------------------
(ii) भवान्/भवती विनयशीलः अस्ति अथवा क्रूरः? ------------------------------
(iii) चिन्तयन्तु कक्षापुस्तिकायां च लिखन्तु यत् योग्ये शिष्ये के के गुणाः भवेयुः।

## गतिविधिः

**अधः केषाञ्चित् प्रसिद्धानां शिष्याणां नामानि लिखितानि सन्ति ये विश्वे विख्याताः अभवन्। तेषां गुरूणां नामानि लिखन्तु–**

| | शिष्याः | | गुरवः |
|---|---|---|---|
| (i) | सचिनतेंदुलकरः | – | ------------------------------ |
| (ii) | अर्जुनः | – | ------------------------------ |
| (iii) | स्वामिदयानन्दः | – | ------------------------------ |
| (iv) | पण्डितः रविशंकरः | – | ------------------------------ |
| (v) | चन्द्रगुप्तः | – | ------------------------------ |
| (vi) | सुशीलकुमारः | – | ------------------------------ |



Scanned by CamScanner

# व्याकरणम्

## उपपद-विभक्तिः

■ **अधोलिखितानि वाक्यानि पठन्तु अवगच्छन्तु च–**

(i) बालकः **अम्बां** प्रति धावति।

(ii) पुत्रः **जनकेन** सह भ्रमति।

(iii) सः **निर्धनाय** वस्त्रं यच्छति।

(iv) जनाः **नगरात्** बहिः अगच्छन्।

(v) **वृक्षस्य** उपरि वानरः अस्ति।

(vi) गुरुः **शिष्येषु** स्निह्यति।

**उपरिलिखितेषु वाक्येषु स्थूलपदेषु उपपदविभक्तेः करणात् विभक्तेः प्रयोगः अस्ति।**

वाक्येषु— प्रति, सह, यच्छति, बहिः, उपरि स्निह्यति च उपपदविभक्तयः सन्ति।

**ध्यातव्यम्–**

- 'प्रति', 'विना' योगे द्वितीया विभक्तिः भवति।
- 'सह', 'अलम्' योगे तृतीया विभक्तिः भवति।
- 'नमः', 'दा' (यच्छ्) योगे चतुर्थी विभक्तिः भवति।
- 'बहिः' योगे पञ्चमी विभक्तिःभवति।
- 'उपरि', 'अधः' योगे षष्ठी विभक्तिः भवति।
- 'स्निह्', 'विश्वस्' योगे सप्तमी विभक्तिः भवति।

## अभ्यासः

**1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–**

(i) पुत्रः ------------------------ फलं यच्छति। (अम्बां/अम्बायै)

(ii) सीता ------------------------ सह वनम् अगच्छत् (रामात्/रामेण)



Scanned by CamScanner

(iii) गुरुः -------------------------- बहिः अगच्छत्। (आश्रमात्/आश्रमम्)

(iv) माता -------------------------- स्निह्यति। (बालकस्य/बालके)

(v) -------------------------- विना ज्ञानं न भवति। (विद्यां/विद्या)

**2. उदाहरणं दृष्ट्वा उचितं मेलनं कुर्वन्तु–**

(i) 'प्रति' योगे ----------द्वितीया----------

(ii) 'बहिः' योगे ------------------------------

(iii) 'स्निह्' योगे ------------------------------

(iv) 'अधः' योगे ------------------------------

(v) 'सह' योगे ------------------------------

(vi) 'नमः' योगे ------------------------------

सप्तमी
षष्ठी
पञ्चमी
तृतीया
चतुर्थी
द्वितीया

❊❊❊❊❊❊



Scanned by CamScanner

# मधुराणि वचनानि

एकादशः पाठः

1. मधुरा शर्करा द्राक्षा मधुरा **मधुरं मधु**।

   मधुरं **मातृतुल्यं** तु त्रैलोक्येऽपि न किञ्चन।।

**अन्वयः** शर्करा मधुरा द्राक्षा मधुरा मधु मधुरं (भवति)। मातृतुल्यं तु मधुरं त्रैलोक्ये अपि किञ्चन न।

**भावार्थः** शर्करा मधुरा भवति। द्राक्षाफलानि अपि मधुराणि भवन्ति। मधु तु अतीव मधुरं भवति। किन्तु संसारे मातुः स्नेहः सर्वाधिकः मधुरः भवति। मातुः सदृशं सुखदायकं तु अन्यत् किमपि नास्ति।

2. निद्रा **दूरयते** चिन्तां निद्रा दूरयते **व्यथाम्**।

   निद्रा दूरयते **क्लान्तिं** निद्रा दुःखविनाशिका।।

**अन्वयः** निद्रा चिन्तां दूरयते, निद्रा व्यथाम् दूरयते, निद्रा क्लान्तिं दूरयते, निद्रा दुःखविनाशिका।

**भावार्थः** अस्माकं स्वास्थ्याय निद्रा अतीव आवश्यकी भवति। निद्रा मानवस्य चिन्तां दूरीकरोति। निद्रा मानसिकं शारीरिकं च कष्टम् अपि हरति। अधिकेन परिश्रमेण शरीरे या शिथिलता भवति निद्रा ताम् अपि अपनयति। अतः निद्रा सर्वेषां दुखानां निवारणं करोति।

3. **विद्यया वर्धते** तेजः विद्यया वर्धते **वपुः**।

   विद्यया वर्धते **वीर्यं** विद्यया किं न वर्धते।।

**अन्वयः** विद्यया तेजः वर्धते, विद्यया वपुःवर्धते, विद्यया वीर्यं वर्धते, विद्यया किं न वर्धते।



Scanned by CamScanner

भावार्थः विद्यायाः प्रभावेन मनुष्यस्य शरीरं तेजोमयं भवति। विद्यया शरीरस्य समुचितः विकासः भवति। विद्यां प्राप्य मानवः बलवान् भवति। अतः विद्या मानवस्य सर्वप्रकारेण सहायिका भवति।

4. मधुरं मधुरेभ्योऽपि मङ्गलेभ्योऽपि **मङ्गलम्**।

**पावनं** पावनेभ्योऽपि मधुरवचनं केवलम्।।

अन्वयः मधुरेभ्यः अपि मधुरं, मङ्गलेभ्यः अपि मङ्गलम्, पावनेभ्यः अपि पावनं केवलम् मधुरवचनम्।

भावार्थः मधुरं वचनम् अति महत्त्वपूर्णं भवति। एतत् सर्वेभ्यः मधुरवस्तुभ्यः अधिकं मधुरं भवति। सर्वेभ्यः कल्याणेभ्यः अपि अधिकं कल्याणकारकं भवति। सर्वेभ्यः पवित्रवस्तुभ्यः अधिकं पवित्रं भवति। अतः सर्वदा मधुरम् एव वक्तव्यम्।

5. **विदेशेषु** धनं विद्या व्यसनेषु धनं **मतिः**।

परलोके धनं धर्मः**शीलं** सर्वत्र वै धनम्।।

अन्वयः विदेशेषु विद्या धनं, व्यसनेषु मतिः धनं, परलोके धर्मः धनः शीलं सर्वत्र वै धनम्।

भावार्थः यदा मनुष्यः विदेशं गच्छति तदा तस्य विद्या अर्थात् ज्ञानम् एव सर्वविधां सहायतां करोति। यदि कोऽपि जनः कस्मात् अपि कारणात् कुमार्गे संलग्नः भवति तदा तस्य बुद्धिः एव सहायिका भवति। मनुष्यः यत् धर्मकार्यं करोति, स्वकर्तव्यं सत्यनिष्ठया करोति तदा तत् एव परलोके तस्य सहायतां करोति। किन्तु मानवस्य सदाचारः तु सर्वत्र एव सहायकः भवति।



Scanned by CamScanner

## शब्दार्था : Word-Meaning

| | | |
|---|---|---|
| मधुरं | मीठा | sweet |
| मधु | शहद | honey |
| मातृतुल्यं | माता के समान | like a mother |
| व्यथाम् | पीड़ा को | to pain |
| क्लान्तिं | थकावट को | tiredness |
| विद्यया | विद्या से | with education/wisdom |
| वर्धते | बढ़ता है/बढ़ती है | increases |
| वपुः | शरीर | body |
| वीर्यं | वीरता/बल | bravery/strength |
| मङ्गलम् | कल्याण | for welfare |
| पावनं | पवित्र | pure |
| विदेशेषु | दूसरे देशों में | other countries |
| मतिः | बुद्धि | wisdom |
| शीलं | उत्तम आचरण | best behaviour |



Scanned by CamScanner

## अभ्यासः

1. एतानि वाक्यानि 'शुद्धानि' अथवा 'अशुद्धानि' इति वदन्तु लिखन्तु च–

(i) मातृतुल्यं मधुरं तु त्रैलोक्ये अपि किञ्चन न अस्ति। ------------------

(ii) मधुरवचनं सर्वदा कल्याणकारकं भवति। ------------------

(iii) परलोके धर्मः एव धनं भवति। ------------------

(iv) निद्रा सुखविनाशिका अस्ति। ------------------

(v) विद्यया सर्वं वर्धते। ------------------

2. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु–

(i) मधुरेभ्यः अपि मधुरं -------------- भवति।

(ii) निद्रा -------------- दूरयते।

(iii) विद्यया -------------- वर्धते।

(iv) विदेशेषु धनं -------------- भवति।

(v) मधु -------------- भवति।

| तेजः |
|---|
| मधुरं |
| चिन्तां |
| विद्या |
| मधुरवचनं |

3. समानार्थकं शब्दं चित्वा लिखन्तु–

(i) वपुः ----------------------------

(ii) लोके ----------------------------

(iii) पावनम् ----------------------------

(iv) व्यथाम् ----------------------------

(v) मतिः ----------------------------

| पवित्रम् |
|---|
| बुद्धिः |
| शरीरम् |
| कष्टम् |
| संसारे |

4. एतेषां प्रश्नानाम् उत्तराणि एकपदेन वदन्तु लिखन्तु च–

(i) परलोके धनं किम् अस्ति? ------------------------------------

(ii) शर्करा कीदृशी भवति? ------------------------------------



Scanned by CamScanner

(iii) मधुरेभ्यः अपि मधुरं किं भवति? ----------------------------------------

(iv) वीर्यं कया वर्धते? ----------------------------------------

(v) व्यसनेषु धनं किम् अस्ति? ----------------------------------------

5. **एतेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन वदन्तु लिखन्तु च-**

(i) का दुःखविनाशिका भवति?

----------------------------------------

(ii) का संसारे सर्वाधिकं सुखं यच्छति?

----------------------------------------

(iii) मङ्गलेभ्यः अपि मङ्गलम् किम्?

----------------------------------------

(iv) किं सर्वत्र धनं भवति?

----------------------------------------

(v) विद्यया किं किं वर्धते?

----------------------------------------

6. **स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुर्वन्तु-**

(i) निद्रा **क्लान्तिं** दूरयते।

----------------------------------------

(ii) पावनेभ्यः अपि पावनं **मधुरवचनम्** अस्ति।

----------------------------------------

(iii) **निद्रा** चिन्तां दूरीकरोति।

----------------------------------------

(iv) **विद्यया** वपुः वर्धते।

----------------------------------------

(v) **परलोके** धर्मः धनं भवति।

----------------------------------------



Scanned by CamScanner

■ **मूल्यात्मकः प्रश्नः**

**अस्मिन् पाठे भवान्। भवती यत् अपठत् तेषु किं ग्रहीतुम् इच्छति किं च त्यक्तुम्। यत् ग्रहीतुम् इच्छति तस्य समक्षे 'ग्रहीतुम् इच्छामि' यत् त्यक्तुम् इच्छति तस्य समक्षे 'त्यक्तुम् इच्छामि' इति लिखन्तु-**

(i) मातुः स्नेहम् ------------------------------।

(ii) विद्याम् ------------------------------।

(iii) मधुरं वचनम् ------------------------------।

(iv) अधर्मम् ------------------------------।

(v) शीलम् ------------------------------।

■ **गतिविधिः**

**विद्यायाः उपरि श्लोकद्वयम् लिखित्वा स्मरन्तु कक्षायां च श्रावयन्तु।**



Scanned by CamScanner

# व्याकरणम्

## प्रत्ययः
**[Suffix]**

■ **एतानि वाक्यानि पठन्तु अवगच्छन्तु च–**

(i) अहं **पठित्वा** गृहम् आगच्छामि। — सः **पठितुम्** विद्यालयं गच्छति।

(ii) वयं **क्रीडित्वा** आगच्छामः। — ते **क्रीडितुम्** गच्छन्ति।

(iii) सा **भ्रमित्वा** कार्यं करोति। — ताः **भ्रमितुम्** उद्यानं गच्छन्ति।

(iv) शिशुः दुग्धं **पीत्वा** क्रीडति। — सा जलं **पातुम्** इच्छति।

(v) बालकाः **धावित्वा** क्रीडन्ति — बालिकाः **धावितुम्** तत्र गच्छन्ति।

❖ एतेषु वाक्येषु प्रथमवर्गस्य स्थूलपदेषु 'क्त्वा' प्रत्ययः द्वितीयवर्गस्य स्थूलपदेषु च 'तुमुन्' प्रत्ययः अस्ति।

**ध्यातव्यम्–**

प्रत्ययस्य प्रयोगः धातूनां वा शब्दानाम् अन्ते भवति।

## अभ्यासः

**1. अधोलिखितधातुभिः सह 'क्त्वा' 'तुमुन्' प्रत्ययौ च योजयित्वा लिखन्तु–**

| | धातवः | 'क्त्वा' प्रत्ययः: | 'तुमुन्' प्रत्ययः |
|---|---|---|---|
| (i) | चल् | चलित्वा | चलितुम् |
| (ii) | खाद् | ------------------ | ------------------ |
| (iii) | हस् | ------------------ | ------------------ |
| (iv) | पत् | ------------------ | ------------------ |
| (v) | नम् | ------------------ | ------------------ |
| (vi) | गम् | ------------------ | ------------------ |
| (vii) | दृश् | ------------------ | ------------------ |
| (viii) | भू | ------------------ | ------------------ |
| (ix) | दा | ------------------ | ------------------ |
| (x) | नी | ------------------ | ------------------ |



Scanned by CamScanner

# सङ्ख्याः
## [Numbers]

■ पठन्तु अवगच्छन्तु च–


एकः छात्रः


एका माला


एकम् पुष्पम्


द्वौ नरौ


द्वे घटिके


द्वे पत्रे


त्रयः वानराः


तिस्रः बालिकाः


त्रीणि फलानि


चत्वारः मयूराः


चतस्रः नर्तक्यः


चत्वारि व्यजनानि


पञ्च जनाः


पञ्च महिलाः


पञ्च फलानि

**ध्यातव्यम्–**

एकतः चतुर् पर्यन्तं सङ्ख्यापदानां प्रयोगः: लिङ्गानुसारेण भवति। पञ्चतः अग्रे सर्वेषु लिङ्गेषु सङ्ख्यापदानां प्रयोगः समानः भवति।



Scanned by CamScanner

## अभ्यासः

1. कोष्ठकात् उचितं सङ्ख्यापदं चित्वा रिक्तस्थानानि पूरयन्तु-

   (i) प्रकोष्ठे --------------- व्यजनम् अस्ति। (एकः/एकम्)

   (ii) तत्र --------------- बालकाः पठन्ति। (चत्वारः/चतस्रः)

   (iii) क्रीडाक्षेत्रे --------------- क्रीडकाः सन्ति। (द्वादशाः/द्वादश)

   (iv) शिवस्य --------------- नेत्राणि भवन्ति। (त्रीणि/त्रयः)

   (v) पुराणानि --------------- सन्ति। (अष्टादश/अष्टादशानि)

2. अधोलिखित-सङ्ख्याः संस्कृतेन लिखन्तु-

| | |
|---|---|
| 1. ------------------------------ | 2. ------------------------------ |
| 3. ------------------------------ | 4. ------------------------------ |
| 5. ------------------------------ | 6. ------------------------------ |
| 7. ------------------------------ | 8. ------------------------------ |
| 9. ------------------------------ | 10. ------------------------------ |
| 11. ------------------------------ | 12. ------------------------------ |
| 13. ------------------------------ | 14. ------------------------------ |
| 15. ------------------------------ | 16. ------------------------------ |
| 17. ------------------------------ | 18. ------------------------------ |
| 19. ------------------------------ | 20. ------------------------------ |
| 21. ------------------------------ | 22. ------------------------------ |
| 23. ------------------------------ | 24. ------------------------------ |
| 25. ------------------------------ | |

******



Scanned by CamScanner